# श्रीः
# स्तोत्रपुष्पावली

Pushpa Srivatsan



# स्तोत्रपुष्पावली

***Stotrapuṣpāvalī***

श्रीमती पुष्पा श्रीवत्सन्

Smt. Pushpa Srivatsan

**Stotrapushpāvalī**

by Smt. Pushpa Srivatsan

© Pushpa Srivatsan, 2020

These texts are entirely original compositions of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) Under no conditions can either the whole or any part of any of these composition, (including cover design and frontispiece) be translated, adapted, or used for commercial purposes 2) Neither the whole nor any part of these compositions can be reproduced, recorded, used in public perfomances, or distributed in any other way without prior written permission from the copyright holder, the author Smt. Pushpa Srivatsan.



ओंकारनादसाराय नादोंकारातिशक्तये ।
ओंकारनादरूपाय त्यागराजाय ते नमः ॥

॥ सद्गुरुश्रीत्यागब्रह्मार्पणम् ॥

# Contents

*Preface* **ix**

**1. *ŚrīGaṇeśaPañcakam*** **1**

**2. *ŚrīGaṇeśvarapramāṇikā*** **2**

**3. *Mātṛpañcakam*** **3**

**4. *Guruvandanam*** **4**

**5. *GurustutiPramāṇikā*** **6**

**6. *ŚrīSarasvatīstotram*** **8**

**7. *ŚrīMahālakṣmīstotram*** **10**

**8. *ŚrīŚrīvidyāstotram*** **12**

**9. *ŚrīKamalāmbāPañcadaśākṣarīstotram*** **14**

**10. *ŚrīDharmasaṃvardhanīstotram*** **18**

**11. *ŚrīSītālakṣmīstotram*** **21**

**12. *ŚrīSītārāmastavaḥ*** **23**

**13. *ŚrīRāmaNavāvaraṇastotram*** **27**

**14. *ŚrīHanumatstavaḥ*** **29**

15. *Śrīmadānjaneya Bhujangaprayātastotram* 31

16. *Śrī Kṛṣṇāṣṭakam* 34

17. *Śrī Kṛṣṇāṣṭottaraśatanāmastotram* 36

18. *Śrī Kṛṣṇāṣṭottaraśatanāmāvalī* 42

19. *Śrī Śrīnivāsastotram* 48

20. *Śrī Raṅganāthāṣṭakam* 50

21. *Śrī Lakṣmīnṛsiṃhastotram* 52

22. *Śrī Lakṣmīnārāyaṇa Bhujaṅgaprayātastotram* 54

23. *Śrī Naṭarājastavaḥ* 56

24. *Sadāśiva Pramāṇikā* 58

25. *Śrī Subrahmaṇyastavaḥ* 60

26. *Śrī Gaṅgādaśakam* 62

27. *Khagaṅgā Bhujaṅgaprayātam* 45

28. *Śrī Gaṅgā Pramāṇikāstutiḥ* 47

29. *Himālayastutiḥ* 49

30. *Sūryastutih* 52

31. *Jyotirlakṣmīstotram* 54

32. *Aparādhakṣamā* 56

## PREFACE

This bunch of blossoms of devotion is offered at the shrine of Sadguru Śrī Tyāgabrahmam. These *stotram*s are spontaneous expressions of this worshipper's communion with the Divine. They were born on different occasions of special *pūjā*s of the deities concerned.

The initial two *stotram*s on Śrī Gaṇeṣa were born on *Gaṇeśa Caturthi*. ***Mātṛpañcakam*** is on the author's mother. ***Śrī Kṛṣṇāṣṭakam*** was the butter-*naivedyam* on *Śrī Jayanti*, Lord Kṛṣṇa's birthday. *Navarātri* was the occasion for the three *stotram*s on Sarasvatī, Mahālakṣmī and Śrī Vidyā. ***Śrī Sarasvatī Stotram*** was an inspiration on the day of *Sarasvatī Pūjā*.

The ***Kamalāmbā Pañcadaśākṣarī stotram*** is an offering to the Supreme Goddess of *Śrī Cakra*. It begins with *dhyānāṣṭakam* (eight *śloka*s). Each of the next 15 *śloka*s starts with the respective syllable of the *pañcadaśākṣarī mantra* of the Goddess. In some of the *śloka*s the adjectives of the Goddess (who is *Rāgasvarūpiṇī* – Form of melody) are also the names of the *rāga*s.

***Śrī Dharmasaṃvardhanī stotram*** is on the Goddess of *Pañcanadakṣetra* (Tiruvaiyaru) on whom Sadguru Śrī Tyāgabrahmam has sung several *kṛti*s.

***Śrī Sītālakṣmī Stotram*** was written at the behest of a friend who felt there were many *stotram*s on Śrī Rāma but not so many on Mother Sītā. Of course, prompt came ***Śrī Sītārāmastavaḥ*** and ***Śrī Hanumatstavaḥ***! ***Śrī Śrīnivāsa stotram*** has its *bījam* in the *Nirmālya darśanam* of the Lord of Tirupati, with a beatific smile on His lotus face.

The vibrations of the powerful Presence of Lord Narasiṃha of Joshimath (en route Badrinath) inspired ***Śrī Lakṣmīnṛsiṃha stotram***. ***Śrī Lakṣmī Nārāyaṇa Bhujaṅgaprayatastotram*** is on *Anantaśayana* Lord Viṣṇu with Lakṣmī in the milky ocean and ***Śrī Naṭarājastavaḥ*** describes the cosmic dance of Lord Naṭarāja.

Mother Gaṅgā blessed the author with a *Śivaliṅga* which landed in her hand while taking a dip in the holy Gaṅgā. ***Sadāśivapramāṇikā*** was the author's worship of the *Liṅgarūpi* Lord at the thrilling sight of *pārijāta* flowers showering on Him from the tree under which He was installed at home.

***Śrī Gaṅgā Pramaṇikā stutiḥ*** was written when the author was fed up

with proof reading translations of ***Śrī Gaṅgā Sahasram***. She needed the cool, lilting comfort of the Gaṅgā! ***Khagaṅgā Bhujaṅgaprayātam*** sprung out when the author was gazing at the gushing Gaṅgā with dancing waves gleaming gold and silver in the moonlight.

***Jyotirlakṣmī stotram*** was born on *Kārtigai Dīpam* and ***Sūryastutiḥ*** on *Makara Saṃkrānti*.

Each *stotram* thus has a background. The guiding force behind all these is Sadguru Śrī Tyāgarāja Svāmī. The *sloka*s in ***Aparādhakṣamā*** are no hyperbole. That is the real feeling of this humble worshipper of the Sadguru.

***Om̃***

Pushpa Srivatsan

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ श्रीगणेशपञ्चकम् ॥

*ॐ विनायकाय विद्महे। विघ्नघ्नाय च धीमहि। तन्नो दन्तिः प्रचोदयात् ॥*

विनायकैकदन्ताय व्यासभारतलेखिने ।
विद्यारम्भविनूताय विघ्नेश्वराय ते नमः ॥ १

गणेश्वराय गम्याय गानारम्भनुताय च ।
गंरूपाय गरिष्ठाय गौरीसुताय ते नमः ॥ २

अक्षरारम्भवन्द्याय आगाधज्ञानसिद्धये ।
इहलोकसुसन्नेत्रे ईशपुत्राय ते नमः ॥ ३

उत्तमश्लोकपूज्याय ऊर्ध्वदृष्टिप्रसादिने ।
एकचित्तप्रदात्रे च ऐक्यध्येयाय ते नमः ॥ ४

ओंकारवक्रतुण्डाय औपहारिकगीतये ।
पञ्चकश्लोकमालाय पुष्पार्चिताय ते नमः ॥ ५

*मङ्गलं गणनाथाय सर्वारम्भाय मङ्गलम् ।*
*मङ्गलं जयकाराय हेरम्भाय सुमङ्गलम् ॥*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीगणेश्वरप्रमाणिका ॥

गणेशनाममोदनं कराम्बुजस्थमोदकम् ।
वरप्रसाददैविकं सुरासुरार्चितं वरम् ॥ १

कुविघ्नवारणं गणं सुहासहस्तिवक्त्रकम्।
शिवाशिवस्य पुत्रकं शिवाकरं शिवंकरम् ॥ २

सुकार्यसादरानुतं सुकाव्यपुष्पवर्षकम्।
सुभाषदं सुगानदं सुनामकीर्तनामुदम् ॥ ३

सुनामकं सुबोधदं लयश्रुतिप्रनृत्यकम् ।
सुकाव्यनादरासकं सुरासशब्दभावकम् ॥ ४

सुरागदं विरागदं लयाश्रयं लयास्पदम् ।
सदामुदं मुदारसं सदा भजे गणेश्वरम् ॥ ५

गुरुप्रगेयनाटकं गुरुप्रसन्नकीर्तनम् ।
गुरुप्रसादकीर्तितं गुरुप्रसाददायकम् ॥ ६

गणेश्वरप्रमाणिका गणेश्वरप्रसादिका।
गणेश्वरप्रसादजा गणेश्वरप्रसाददा॥ ७

प्रसादकाय मङ्गलं रुजापहाय मङ्गलम्।
गणेश्वराय मङ्गलं सुमङ्गलाय मङ्गलम् ॥ ८

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ मातृपञ्चकम् ॥

*मातृगायत्री*

*ॐ मातृदेव्यै च विद्महे। वरदायै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात् ॥*

लक्ष्मीं वरदपत्नीं च क्षान्तां सुप्रियसेविताम् ।
वीणासङ्गीतलोलां च मन्मातरं नमाम्यहम् ॥ १

अन्नपूर्णां बुभुक्षाहां स्वस्तिवाचास्पदां वराम् ।
सत्कारुण्यगुणामम्बां मन्मातरं नमाम्यहम् ॥ २

रोगपीडापहश्लोकां रोगशोकोपशामनीम् ।
श्लोकप्रियां स्तुतां स्तुत्यां मन्मातरं नमाम्यहम् ॥ ३

रामकृष्णप्रियां भक्तां रामायणकथाप्रियाम् ।
श्रीमद्भागवतप्रीतां मन्मातरं नमाम्यहम् ॥ ४

त्यागराजकृतिप्रीतां पुत्रीपुष्पाप्रियस्तुताम् ।
शतायुर्मङ्गलाशीदां मन्मातरं नमाम्यहम् ॥ ५

*मङ्गलं मम मात्रे च लक्ष्मीनाम्न्यै सुमङ्गलम् ।*
*मङ्गलं प्रियदात्र्यै च मनोगायै सुमङ्गलम् ॥*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ गुरुवन्दनम् ॥

*ॐ त्यागराजाय विद्महे। नादगङ्गाय धीमहि। तन्नस्सद्गुरुः प्रचोदयात् ॥*

नमः श्रीत्यागराजाय नमः सुज्ञानतेजसे ।
नमः श्रीरामभक्ताय आचार्याय नमो नमः ॥ १

नादावतारपूज्याय नादोपासनमार्गिणे ।
नादार्चितपरब्रह्मश्रीरामाय नमो नमः ॥ २

जप्ततारकसन्मन्त्रशतकोटिसुकीर्तये ।
श्रीरामभद्रसन्नामतारकानन्दमूर्तये ॥ ३

यागरक्षणसंदर्शनाह्लादहृष्टिरूपिणे ।
गङ्गाप्रवाहवाग्वर्षसंसिक्तराममूर्तये ॥ ४

सुस्वरासारसत्कीर्तनानन्दबाष्पकण्ठिने ।
प्रासानुप्राससंभासशैलीगभीरगायिने ॥ ५

सहस्रायुतसत्कीर्तनागीतरामतेजसे ।
सुदिव्यनामसङ्कीर्तनालासलयलासिने ॥ ६

रागताललयालास्यकृतिवृन्दप्रसारिणे ।
रामभक्तिसुधाप्लावस्वानुभूतिप्रकाशिने ॥ ७

रागानुरागसज्ज्ञानसंक्षेपकृतिबोधिने ।
नामगानाधिराजाय सद्भक्तिरसगीतये ॥ ८

नादयोगसुनिष्ठाय ध्यानयोगसमाधये ।
भक्तियोगवरिष्ठाय ज्ञानयोगसुसिद्धये ॥ ९

वेदोपनिषदासारकृतिगङ्गाप्रवाहिणे ।
वेदवेदान्तसत्सारबोधसद्गुरवे नमः ॥ १०

*पुष्पासवसुगानाय नामपुष्पार्चिताय च ।*
*पुष्पावलिसुरागाय त्यागराजाय मङ्गलम् ॥ ११*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ गुरुस्तुतिप्रमाणिका ॥

*ॐ त्यगराजाय विद्महे । वाक्स्वरूपाय धीमहि । तन्नो गुरुः प्रचोदयात् ॥*

सुनादरामपूजनं सुगानसर्वमोदनम् ।
सरागभक्तिवन्दितं सुगीतसेवितं गुरुम् ॥ १

सुरामनामकीर्तनं सुनामगानतल्लजम् ।
समाधियोगसंस्थितं सदासुलीननामकम् ॥ २

सुगानवर्षगङ्गिकं सुगीतनामतारकम् ।
गलस्वरातिमञ्जुलं श्रुतिस्वलीनगीतकम् ॥ ३

लयप्रशान्तिकीर्तनं प्रवाहरागसारतम् ।
सुनामतारकाजपं सुदृष्टरामविग्रहम् ॥ ४

सुनादरूपतेजसं सुलीननादसद्रसम् ।
सदाविलीनरामकं सदानुभूतदैविकम् ॥ ५

कराम्बुजस्थझल्लकं सुलासपादपङ्कजम् ।
लयश्रुतिस्वभावकं प्रगीतभावकीर्तनम् ॥ ६

सुतत्त्वसत्त्वदर्शनं अहंहरम् अहँल्लयम् ।
मनोविलीनसद्गुरुं विलीनमानसार्चितम् ॥ ७

मनःप्रसन्नदैवतं मनःप्रसादरूपकम् ।
मनोजपुष्पसार्चितं मनोजभावसामुदम् ॥ ८

स्वभावमानसार्पणं सुरागभावमोदितम् ।
स्वरागरत्नमालिकं स्वशिष्यपुष्पमालिकम् ॥ ९

सुपादसेविताश्रयं पदागतासुरक्षणम् ।
सदा भजे गुरुं शुभं सुभव्यमङ्गलास्पदम् ॥ १०

*गुरुस्तुतिप्रमाणिका गुरुप्रचोदमातृका ।*
*गुरुप्रमोददायिका गुरुप्रसादमङ्गला ॥* *११*

*गुरुप्रसादमङ्गलं सदाशुभं सुमङ्गलम् ।*
*सरक्तिगाथमङ्गलं सुभक्तिगीतमङ्गलम् ॥* *१२*

*मङ्गलं त्यागराजाय गुरुदेवाय मङ्गलम् ।*
*प्रमाणिकास्तुतिस्तोत्रपुष्पार्चिताय मङ्गलम्॥*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ श्रीसरस्वतीस्तोत्रम् ॥

*ॐ सरस्वत्यै च विद्महे । वागर्थायै च धीमहि । तन्नो वाणी प्रचोदयात् ॥*

*ध्यानम्*

*नमस्तुभ्यं वरे देवि वीणापुस्तकधारिणि ।*
*विद्यासम्पत्तिदे वाणि सरस्वति नमोस्तु ते ॥* १

*ऐंबीजपूजिते देवि वीणासङ्गीतमोदिते।*
*ज्ञानमोक्षकविस्फूर्ते सरस्वति नमोस्तु ते ॥* २

वाग्देवीं स्वरमाधुर्यां सङ्गीतकवितावराम् ।
वीणापुस्तकसंवासां वाणीं वन्दे सरस्वतीम्॥ ३

वीणागानप्रवीणां च विद्याकूटविलासिनीम् ।
गानमाधुर्यवाचं च वाणीं वन्दे सरस्वतीम् ॥ ४

वीणासयुक्तकण्ठां च वीणाऽभेदमृदुस्वराम् ।
वीणासुस्वरसानन्दां वाणीं वन्दे सरस्वतीम् ॥ ५

ज्ञानमोक्षप्रदात्रीं च ज्ञानिसज्ज्ञनवल्लभाम् ।
ज्ञानसद्गुरुरूपां च वाणीं वन्दे सरस्वतीम्॥ ६

वागर्थपुष्टिसंयुक्तां वाग्वर्णवर्णमालिकाम् ।
वाक्सम्पत्सम्प्रदात्रीं च वाणीं वन्दे सरस्वतीम् ॥ ७

गङ्गाप्रवाहवाग्वर्षां वाक्शब्दलयवासिनीम् ।

श्लोकशैलीसुनृत्यां च वाणीं वन्दे सरस्वतीम् ॥ ८

रागतालगतिस्थाम्बां लयलास्यसुवाचिकाम् ।
कवितोल्लोललोलां च वाणीं वन्दे सरस्वतीम्॥ ९

शारदां स्वरसामोदां रागदां वरदां वराम् ।
वरसुस्वरविद्यां च वाणीं वन्दे सरस्वतीम्॥ १०

श्वेतपुष्पासनासन्नां श्वेतमुत्यस्मितानननाम् ।
श्वेतवस्त्रसुभूषां च वाणीं वन्दे सरस्वतीम् ॥ ११

हिमश्वेतालयां श्वेतां हिमशृङ्गविकासिनीम् ।
हिमश्वेतासरां गङ्गां वाणीं वन्दे सरस्वतीम् ॥ १२

संसारतापशाम्यां च संसारदुःखमोचनीम् ।
सङ्गीतसत्सुखावाहां स्तुत्यां वन्दे सरस्वतीम् ॥ १३

त्यागराजसुवाक्संस्थां शिष्यापुष्यानुतिस्थिराम् ।
सङ्गीतसुस्वरां वाणीं ब्राह्मीं वन्दे सरस्वतीम् ॥ १४

सरस्वत्यर्पणं स्तोत्रं सरस्वत्याः कृपोद्भवम् ।
सरस्वत्यर्चनं श्रेष्ठं सरस्वत्याः कृपावहम् ॥ १५

*मङ्गलं मातृकायै च सरस्वत्यै सुमङ्गलम् ।*
*वाण्यै सङ्गीतवाण्यै च गीर्वाण्यै शुभमङ्गलम् ॥* १६

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीमहालक्ष्मीस्तोत्रम् ॥

*ॐ श्रीरूपायै च विद्महे । शुभदायै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ।*

श्रींबीजपूजिते देवि हरिवक्षस्थलालये ।
सर्वसौमङ्गलाधात्रि महालक्ष्मि नमोस्तु ते ॥ १

विद्यालक्ष्मि सुधासारे ज्ञानलक्ष्मि वसुप्रदे ।
भद्रे लक्ष्मि नमस्तुभ्यं मोक्षलक्ष्मि प्रसीद मे ॥ २

सर्वलक्षणलक्षण्ये सौमङ्गल्यसुविग्रहे ।
स्वस्तिवाक् श्रीः शुचीरूपे शान्तिरूपे सुखास्पदे ॥ ३

अष्टैश्वर्यप्रदे लक्ष्मि अष्टलक्ष्मि सुपूजिते ।
नित्यैश्वर्यवरे लक्ष्मि नित्यानन्दस्वरूपिणि ॥ ४

धनधान्यसुसन्तानधैर्यसौन्दर्यरूपिणि ।
तनुरारोग्यसौभाग्यसानन्दसिद्धिदायिनि ॥ ५

उषोरागजये लक्ष्मि उषोगानप्रसादिनि ।
सन्ध्यासुरागसङ्गीते सन्ध्यादीपप्रकाशिनि ॥ ६

गीतवाद्यप्रिये लक्ष्मि गतकर्मजसत्पदे ।
ओंकारसदने मातः कुरुदृष्टिप्रसादनम् ॥ ७

नादोंकारस्वरूपे श्रीः सुनादस्वरसालये ।
नादसुस्वरमाधुर्ये नादान्तःप्रशमालये ॥ ८

मनःस्फूर्तिकरे लक्ष्मि मनःसारसवासिनि ।
मनःपुष्पार्चिते मातर्मनोमयमदम्बिके ॥ ९

आदिलक्ष्मि मदम्ब त्वं रक्ष मां कुरु त्वत्कृपाम् ।
आधिव्याध्यार्तिपङ्काद्विमोचनं कुरु शाश्वतम् ॥ १०

पङ्केरुहविशालाक्षि कटाक्षेण विमोचय ।
सदा मां पातु मालक्ष्मि सदा तिष्ठ मया सह ॥ ११

जन्ममृत्युजरातापजालाद्विमोचनं कुरु ।
कुरु मे त्वयि लीनं श्रीः कुरु जन्मनिवारणम् ॥ १२

इहसौख्ये सुमाङ्गल्ये परमोक्षप्रदायिनि ।
श्रीमन्नारायणानन्दे लक्ष्मि तुभ्यं नमो नमः ॥ १३

*मङ्गलं श्रीमहालक्ष्म्यै शुभलक्ष्म्यै सुमङ्गलम् ।*
*मङ्गलं मङ्गलाङ्गायै मात्रे नित्यं सुमङ्गलम् ॥ १४*

*त्यागराजगुरुस्वामिशिष्यापुष्पाकृतस्तुतिः ।*
*महालक्ष्मीबहुप्रीता सुमाङ्गल्या शुभप्रदा ॥ १५*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीश्रीविद्यास्तोत्रम् ॥

*ॐ श्रीविद्यायै च विद्महे। नादबीजाय धीमहि। तन्नः शक्तिः प्रचोदयात्॥*

ह्रींबीजपूजिते देवि महामेरुनिवासिनि ।
श्रीषोडशाक्षरीविद्ये सुवासिनि नमोस्तु ते ॥ १

षोडशीपूजिते देवि षोडशीमन्त्ररूपिणि ।
षोडशीगुप्तसद्रूपे षोडशस्तोत्रमालिके ॥ २

नादबिन्दुकलारूपे नवावरणपूजिते ।
नानारागस्तुते देवि नारायणि नमोस्तु ते ॥ ३

वीणागानप्रिये मातर्वीणामृदुलसुस्वरे ।
वीणासँल्लयसङ्गीते वीणालये नमोस्तु ते ॥ ४

गानाञ्जलिससन्नुते गानमञ्जुलवाग्वरे ।
गानस्फूर्तिकरे मातर्गानलोले नमोस्तु ते ॥ ५

कविताप्रेरणे गौरि कविहृत्कमलालये ।
कवितोत्पलसौरभ्ये काव्यवासे नमोस्तु ते ॥ ६

नादोपासितसानन्दे नादाकृतिनमस्कृते ।
नादोपासिकहृन्नादे नादमूले नमोस्तु ते ॥ ७

नामरूपादिसर्वस्वे नामरूपविवर्जिते ।
नामरूपातिसौन्दर्ये नामरूपे नमोस्तु ते ॥ ८

रामनामप्रिये देवि नामगानातितोषिते ।
नामसङ्गीतमाधुर्ये नादरूपे नमोस्तु ते ॥ ९

त्यागराजगुरुस्वामिसत्सङ्गीतप्रमोदिते ।
शिष्यापुष्पाकृतस्तोत्ररागभावे नमोस्तु ते ॥ १०

मूकवाक्संस्तुते देवि मूककोकिलसुस्वने ।
मूकवाक्स्तुतिसुश्लोके मूकाम्बिके नमोस्तु ते ॥ ११

इहतृष्णापहे मातः सुज्ञानक्षीरपायने ।
परानन्दप्रदे मातर्वरानन्दे नमोस्तु ते ॥ १२

शक्तिरूपे शिवे मातः शिवरूपे शिवप्रिये ।
शिवशक्त्यैक्यचिद्रूपे शिवशक्ते नमोस्तु ते ॥ १३

प्राणशक्तिकविप्राणे आत्मशक्तिस्वरूपिणि ।
नादशक्तिमनःशक्ते शक्तिमूले नमोस्तु ते ॥ १४

आदिशक्तिमदम्ब त्वं अखिलाण्डैकरूपिणि ।
प्रसीद मे नमो मातः स्तोत्रमेतत्तवार्पणम् ॥ १५

*मङ्गलं ते सुमाङ्गल्ये मङ्गलं कमलालये ।*
*मङ्गलं सर्वसत्सारे श्रीविद्ये शुभमङ्गलम् ॥* १६

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीकमलाम्बापञ्चदशाक्षरीस्तोत्रम् ॥

*ॐ मन्त्रदेव्यै च विद्महे। मातृकायै च धीमहि। तन्नः शिवा प्रचोदयात् ॥*

*ध्यानाष्टकम्*

*सङ्गीतसद्गुरुस्वामित्यागब्रह्मसुकीर्तिताम् ।*
*गुरुकीर्तनसानन्दां वन्दे श्रीकमलालयाम् ॥* १

*श्रीदीक्षितकृताश्चर्यनवावरणकीर्तनाम् ।*
*कीर्तनापूज्यवाग्देवीं वन्दे श्रीकमलाम्बिकाम् ॥* २

*कमनीयातिलावण्यां कमनीयमृदुस्वराम् ।*
*कलसुस्वरगानीयां वन्दे श्रीकमलाम्बिकाम् ॥* ३

*नादोपासनसुप्रीतां नादविद्यातिदेवताम् ।*
*नादसुस्वरवागर्थां वन्दे श्रीकमलाम्बिकाम् ॥* ४

*वीणासङ्गीतलोलां च कलवीणास्वरस्वराम् ।*
*वीणालयां स्वराह्लादां वन्दे श्रीकमलाम्बिकाम् ॥* ५

*सङ्गीतसुस्वरां वाचां सप्तस्वरसुनृत्यकाम् ।*
*स्वरविद्यार्थिसंश्रायां वन्दे श्रीकमलाम्बिकाम् ॥* ६

*सप्तस्वरपरानिष्ठां सप्तस्वरसुविग्रहाम् ।*
*सप्तस्वरसुपुष्पार्चां वन्दे श्रीकमलाम्बिकाम् ॥* ७

*कंदधां कमलाम्बां श्रीकादिविद्योपचारिताम् ।*
*हादिसादीतिमन्त्रार्थां वन्दे मन्त्रस्वरूपिणीम् ॥* ८

कल्याणी कलगीर्वाणी काम्भोजकरुणेक्षणा ।
कल्याणसुवसन्तश्रीः कीरवाणीमधुस्वरा ॥ १

एकनिष्ठाभिनिध्याता एकाक्षरी सुशङ्करी ।
एकब्रह्मस्वरूपा च एकशब्दस्वरालया ॥ २

ईशवामसुपार्श्वा च ईश्वरी जगदीश्वरी ।
ईश्वरानुग्रहापूर्णा ईशसन्नुतपूरणी ॥ ३

लक्षणान्वितपादाङ्का शुभलक्षणलक्षिता ।
लगनीया लसद्रागा ललिता ललिताम्बिका ॥ ४

ह्रींकारमन्त्रसद्रूपा ह्रींकारमन्त्रमोदिनी ।
ह्रींकारशब्दसाराध्या ह्रींकारशब्दनादिनी ॥ ५

हसितोत्पलसौन्दर्या हंसानन्दप्रकाशिनी ।
हंसनादसुसङ्गीता हंसगुह्यप्रसादिनी । ६

सङ्गीतसुस्वराराध्या सङ्गीतवरदायिनी ।
सङ्गीतस्वरसान्निध्या सङ्गीतस्वरभूषणी ॥ ७

कराब्जधृतवीणा च करवीणास्वरालया ।
स्वराजितसुवीणा च करवीणालयस्वरा ॥ ८

हरिकेदारगौला च हरिप्रियसहोदरी ।
हरिनारायणी गौरी हरिकाम्भोजपादभा ॥ ९

लसच्छविप्रभारूपा लब्धवर्णा लयालया ।
लालित्यमृदुवाणी च ललितस्वरमाधुरी ॥ १०

ह्रींकारस्वरसम्पूर्णा ह्रींकारध्यानभासुरा ।
ह्रींकारमन्त्रगुह्यार्था ह्रींकारबीजगुप्तका ॥ ११

सकलार्थप्रदा माता सकलागमचारिणी ।
सकलाधरसँल्लास्या सकलाघप्रणाशिनी ॥ १२

कलामयी कलाराध्या कमलालयवैभवा ।
कलसुस्वरमाधुर्या कलगानप्रसादिनी ॥ १३

लयशुद्धिसुगाराध्या लयरागरसाकृतिः ।
लसत्सुमुखलावण्या लयारामा लयारमा ॥ १४

ह्रींकारलयरागा च ह्रींकारप्रीणिनी सती ।
ह्रींकारमन्त्रपावित्र्या ह्रींकारजपगोचरा ॥ १५

श्रींमन्त्रपूजिताध्याता श्रीरागसुन्दरी धरी ।
श्रीरागसुस्वरागीता श्रीरागवाग्विलासिनी । १६

श्रीश्च सरस्वतीरूपा श्रीपञ्चदशमन्त्रिणी ।
श्रीषोडशाक्षरीपूज्या मन्त्रप्रकाशिनी परा ॥ १७

सर्वानन्दमयी विद्या सर्वानन्दप्रदायिनी ।
सर्वानन्दसुचक्राभा सर्वानन्दसुमङ्गला ॥ १८

श्रीचक्रदेवतायै च श्रीपुरायै सुमङ्गलम् ।
रसमेरुसुवासिन्यै सद्रसायै सुमङ्गलम् ॥ १९

मङ्गलं मन्त्रवर्णायै श्रीरागिण्यै सुमङ्गलम् ।
मङ्गलं मूकवाग्दायै कादम्बर्यै सुमङ्गलम् ॥ २०

त्यागराजगुरुस्वामिशिष्यापुष्पाकृतस्तुतिः ।
अम्बाप्रीता गुरुप्रेर्या अम्बापादसमर्पिता ॥ २१

अम्ब नान्योपयुक्ताहं त्वद्भक्तिकीर्तनं विना ।
एतत्सद्भक्तिनैवेद्यं स्वीकुरुष्व मदम्बिके ॥ २२

न्यूनानिच्छिद्रसर्वाणि क्षमस्व परदेवते ।
सदा त्वां संश्रिताहं मे क्षिप्रं प्रसीद सात्त्विकि ॥ २३

कादिविद्यां न जानामि हादिसादिं च नाम्बिके ।
जानामि त्वं मदम्बेति जानामि त्वत् पदाश्रयम् ॥ २४

शब्दावरणदुस्तापं हर मे परमेश्वरि ।
शेषजीवनपर्यन्तं प्रशान्त्यावारयाम्बिके ॥ २५

कर्मानुबन्धजालाद्विमोचनं कुरु पावनि ।
शुभोत्तुङ्गे नमस्तुभ्यं ज्ञानं देहि सुनादकम् ॥ २६

मङ्गलं ते मदम्ब श्रीर्मया सह सदा वस ।
मङ्गलैतत्सुवाग्देवि कुरु मोक्षसुमङ्गलम् ॥ २७

मङ्गलं नादमातस्ते मङ्गलं कमलाम्बिके ।
मङ्गलं ज्ञानसौभाग्ये मोक्षदे शुभमङ्गलम् ॥ २८

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीधर्मसंवर्धनीस्तोत्रम् ॥

*ॐ धर्माम्बायै च विद्महे। भवमोक्त्र्यै च धीमहि। तन्नो देवी प्रचोदयात् ॥*

धर्मसंवर्धनी माता क्षेत्रपञ्चनदालया ।
त्यागब्रह्मसुगेया च बहुरत्नकृतिस्फुरा ॥ १

धर्माम्बिका पराशक्तिश्चराचरमयी जनी ।
ध्यानतत्परसान्निध्या नारायणी नमस्कृता ॥ २

तडिल्लतातनुष्कान्तिस्तेजोमयशरीरिणी ।
तारागणस्फुरद्दृष्टिर्धारिणी भवतारिणी ॥ ३

पुराणी पूर्णसज्ज्ञाना भ्रूमध्यैक्यविलासिनी ।
गुरुकीर्तनसम्पूर्णा रागलयसुलासिनी ॥ ४

करस्थितशुकालापरामनामप्रमोदिनी ।
श्रीत्यागब्रह्मसद्भक्तिगानसन्नाममोदिनी ॥ ५

रामनामप्रिया माता श्रीरामसोदरी सती ।
त्यागराजमधुस्वादुभजनानन्दकामिनी । ६

घनसुस्वरसङ्गीता सुस्वरालयवासिनी ।
सुस्वराजितसारङ्गा सङ्गीतवरदायिनी ॥ ७

वीणासङ्गीतसाराध्या वीणाप्रक्वणनादिनी ।
जितवीणास्वरस्वादुः सङ्गीतस्वरसालया ॥ ८

कार्तस्वरस्वरामिष्टा कार्तस्वरसुविग्रहा ।
कञ्जलोचनवैशाल्या कर्मकर्दममोचनी ॥ ९

राजराजविराजाभा राजीवालोकनच्छविः ।
स्मेरनेत्रकृपावर्षा सत्त्वसम्मृदुभाषिणी ॥ १०

नगजा पञ्चनद्याभा अघजालविमोचनी ।
भक्तिवैराग्यभिक्षादा आयुरारोग्यदायिनी ॥ ११

पञ्चापगेशजायाम्बा प्रणतार्तिहरप्रिया ।
कावेरीतीरसानन्दा क्षेत्रपावित्र्यवर्धनी ॥ १२

हस्ताभयकरी माता इन्दुशीतललोचनी ।
पदपद्मनतागोप्त्री भवसङ्ग्राहमोचनी ॥ १३

दमादिशमसंवर्धा दुरितक्षयकारिणी ।
कर्मबन्धनविच्छेत्री शरणागतपावनी ॥ १४

मनोजारिप्रिया गौरी मनोवाक्कर्मपूजिता ।
मानसालयपुष्पार्चा मानसालयभासुरा ॥ १५

चिन्तनाहरसान्निध्या प्रशान्तमनआलया[1]।
मनआलयनिध्याता निष्कामस्थितिभावना ॥ १६

भावनापूरनैर्मल्या[2] निष्कामपूजिता वरा ।
नैष्कर्म्यसिद्धिसम्पादा मुक्तिदायपदाम्बुजा ॥ १७

ऐहिकामुष्मिकाधात्री पुनर्जन्मनिवारिणी ।
ज्ञानमोक्षफलादात्री ज्ञानसद्गुरुरूपिणी ॥ १८

---

[1]Causing repose of a tranquil mind
[2]The Purity filling the thoughts

त्यागराजगुरुस्वामिशिष्यापुष्पास्तवार्चनम् ।
बालालापनिभागीतं बालाम्बिकापदार्पणम् ॥ १९

अम्बास्तोत्रं गुरुप्रेर्यं अम्बापादसमर्पितम् ।
अम्बानुग्रहकारं च सर्वाघनाशनं शुभम् ॥ २०

अम्बारामं गुरुप्रेष्ठं पञ्चापगेशमोदितम् ।
गायेत्सुरागसम्पूर्णं पूर्णसौमङ्गलावहम् ॥ २१

अनुरागनुते देवि विरागत्वं प्रदेहि मे ।
संसाराद्बहुतप्ताहं भवजालान्विमोचय ॥ २२

भवप्रिये प्रियालोके मे प्रसीद मदम्बिके ।
रागतालवरं देहि देहि मे तव सुस्वरम् ॥ २३

कुरु सद्गानसौभाग्यं देहि मे तव दर्शनम् ।
कुरु स्थिरसुमाङ्गल्यं देहि मे तव सात्मकम् ॥ २४

*मङ्गलं शिवजायायै क्षेत्रेश्वर्यै सुमङ्गलम् ।*
*मङ्गलं गुरुगेयायै मोक्षदायै सुमङ्गलम् ॥* २५

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ श्रीसीतालक्ष्मीस्तोत्रम् ॥

*ॐ भूमिपुत्र्यै च विद्महे । रामपत्न्यै च धीमहि । तन्नः सीता प्रचोदयात् ॥*

सीता श्रीरामसञ्ज्ञाया सानन्दवाक्स्वरूपिणी ।
सा[1] सम्पूर्णसुमाङ्गल्या ज्वलदग्निशुचिस्फुरा ॥ १

मदम्बा श्रीमहालक्ष्मीर्मच्चित्तविलसत्प्रभा ।
क्षमागुण्यातिसान्त्वा मा सहजस्थितसद्गुणा ॥ २

क्षपानाथप्रभारूपा चन्द्रार्कमुखमण्डला ।
सानसीविग्रहाभासा चारुसारप्रभासिनी ॥ ३

पदकोकनदाह्नाभा[2] पदाम्बुजसुलक्षणा ।
पदपावित्र्यलक्षण्या पदाश्रितसुरक्षणा ॥ ४

कराम्भोजाभयादात्री स्मिताम्भोरुहलोचनी ।
करुणामयवीक्षण्या नयनाब्जविमोचनी ॥ ५

सौन्दर्यदेवता सीता क्ष्मापुत्री जनकात्मजा ।
शिवचापलघूद्धारा कोमला शक्तिशालिनी ॥ ६

श्रीरामतन्मया सीता रामपत्नी लसच्छविः ।
कल्याणरामसाराध्या सीता भव्यसुरूपिणी ॥ ७

वैदेही मृदुसद्वाणी ऐहिकापरपूरणी ।
रामप्रेष्ठा महाराज्ञी पूर्णसद्भक्तिकारिणी ॥ ८

---

[1]सा – Lakṣmī
[2]पद + कोकनद + अह्न (Sun)+ आभा

रामनामसुधापाना नामसारप्रमोदिता ।
नामसद्ध्यानसँल्लीना दहराकाशदर्शना ॥ ९

श्रीरामपूर्णसच्चित्ता श्रीरामानन्यचिन्तना ।
श्रीरामकीर्तिसम्मूला रामेण सह चारिणी ॥ १०

रामावतारसम्पूर्णा रामायणसुबीजता[3]।
श्रीरामाभिन्नदिव्याभा साक्षात् ब्रह्मस्वरूपिणी ॥ ११

सुस्वराजितमाधुर्या सङ्गीतमृदुलस्वरा ।
श्रीत्यागब्रह्मसङ्गीता गुरुस्वामिसुकीर्तिता ॥ १२

त्यागराजगुरुस्वामिशिष्यापुष्यासुसंस्तुता ।
बालालापस्तुतिप्रीता पुत्रीपुष्याबहुप्रिया ॥ १३

मयेति कीर्तिते मातर्मच्चित्तं परिपूरय ।
चित्तप्रसादनं मातः कुरु मे भक्तिवर्धनम् ॥ १४

मङ्गलं रामसत्यै च सीतालक्ष्म्यै सुमङ्गलम् ।
मङ्गलं मम मात्रे च महालक्ष्म्यै सुमङ्गलम् ॥ १५

सीतास्तोत्रं सुसम्पूर्णं सीतानुग्रहकारकम् ।
सीतानुग्रहसंभावं सर्वमङ्गलदायकम् ॥ १६

ॐ

## शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्यया कृतं
श्रीसीतालक्ष्मीस्तोत्रं गुरौ समर्पितम् ॥

[3]ता – *Lakshmi*

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीसीतारामस्तवः ॥

*ॐ सीतावराय विद्महे । गुरुगेयाय धीमहि । तन्नो रामः प्रचोदयात् ॥*

## *ध्यानम्*

*ब्रह्माण्डनायकं रामं ब्रह्माशङ्करसंस्तुतम् ।*
*ब्रह्मज्ञानसमष्टिं च ब्रह्मानन्दस्वरूपकम् ॥* १

*पूर्णायुष्कारपूर्णं तं पूर्णसद्भक्तिकारकम् ।*
*पूर्णसज्ज्ञानसद्बोधं पूर्णत्वरूपसद्गुरुम् ॥* २

*क्षित्याभाससुतेजस्कं क्षितिजारमणं हरिम् ।*
*क्षिप्राप्रवाहसुश्लोकं क्षिप्रप्रसाददायकम् ॥* [1] ३

*वन्देऽहं करकाम्भोजं स्मितवक्त्रं सुनेत्रकम् ।*
*परमानन्दसद्रूपं सीतारामं शुभाकरम् ॥* ४

सीतारामं नरोद्धारं परब्रह्मस्वरूपिणम् । [2]
अभयप्रदहस्ताब्जं सीतारामं नमाम्यहम् ॥ १

पदपल्लवबालार्कं तेजोमयास्यविग्रहम् ।
स्मितलोचनकारुण्यं सीतारामं नमाम्यहम् ॥ २

---

[1]क्षिप्रा – Gaṅgā
[2]सीता + आरामं – Delight of Sita

त्यागब्रह्मगुरुप्रेष्ठं गुरुस्वामिबहुस्तुतम् ।
गुरुकीर्तनसम्राजं सीतारामं नमाम्यहम् ॥ ३

सीतासाध्वीकलत्रं तं सीताहृत्पद्मवासनम् ।
सीतामिष्टस्वरावासं सीतारामं नमाम्यहम् ॥ ४

दाशरथ्यतिलावण्यं राघवं धर्मसंस्थिरम् ।
पितृवाक्परिपालं तं सीतारामं नमाम्यहम् ॥ ५

सीताजानिं चापपाणिं लक्ष्मणानुजसेवितम् ।
आञ्जनेयनुतं ध्यातं सीतारामं नमाम्यहम् ॥ ६

घोरराक्षससंहारं घोरपापविमोचनम् ।
घोरसंसारतारं तं सीतारामं नमाम्यहम् ॥ ७

वासनासुरसंहारं कुमनोजगणापहम् ।
प्रसन्नमानसाभासं सीतारामं नमाम्यहम् ॥ ८

ध्यानतत्परसंरक्षं ध्यानारिच्छेदनं हरिम् ।
ध्यातृहृन्मीरखद्योतं सीतारामं नमाम्यहम् ॥ [3] ९

शरणागतवात्सल्यं गुरुगानसुपूजितम् ।
वरसुस्वरमाधुर्यं सीतारामं नमाम्यहम् ॥ १०

शरणार्थ्यभिरक्षं तं अभयव्रतपालनम् ।
परिपालितसद्भक्तं सीतारामं नमाम्यहम् ॥ ११

[3]The Sun over the sea of mind of the meditator

एकवाक्सत्यशीलं स्वं एकशब्दनराकृतिम् ।
एकपत्नीकराजानं सीतारामं नमाम्यहम् ॥ १२

एकाग्रध्यानसंगम्यं एकान्तध्यातृगोचरम् ।
एकान्तं एकशब्दार्थं सीतारामं नमाम्यहम् ॥ १३

मन्त्रतारकनामानं रूपतारकनामकम् ।
मन्त्रराजजपापालं सीतारामं नमाम्यहम् ॥ [4] १४

आत्मारामं स्वरारामं नतभक्तहृदारमम् ।
अभिरामं लयारामं सीतारामं नमाम्यहम् ॥ १५

श्रीत्यागोपनिषत्सारं कीर्तनासारवर्षितम् ।
कृतिगङ्गाभिषिक्तं तं सीतारामं नमाम्यहम् ॥ १६

त्यागराजनुतश्रेष्ठं कृतिरत्नसुभूषणम् ।
त्यागराजसुवाक्चेलं सीतारामं नमाम्यहम् ॥ १७

त्यागराजकृतिप्रीतं गुरुकीर्तनसन्निधिम् ।
भजनाह्लादसान्निध्यं सीतारामं नमाम्यहम् ॥ १८

नादोपासनसानन्दं नादसुस्वरसात्मकम् ।
नादसद्गुरुसात्मानं सीतारामं नमाम्यहम् ॥ १९

उपदेशगुरुं श्रीदं रागदं अनुरागदम् ।
मोक्षदं शाश्वतानन्दं सीतारामं नमाम्यहम् ॥ २०

[4] मन्त्रराज – Śrī Rāma tāraka mantra

त्यागब्रह्मगुरुस्वामिशिष्यापुष्याप्रकीर्तितम् ।
शिशुजल्पनिभालापस्वीकारं तं नमाम्यहम् ॥ २१

सीतारामनुतिस्तोत्रं सीतारामकृपावहम् ।
सद्गुरुप्रेरणागीतं सीतारामपदार्पणम् ॥ २२

तवपादं गृहीताहं अभयं कुरु मेऽच्युत ।
ज्ञाताज्ञातापराधान्मे क्षमस्व मत्प्रभो हरे ॥ २३

*मङ्गलं रामभद्राय सीतारामाय मङ्गलम् ।*
*मङ्गलं ज्ञानमोक्षाय श्रीरामाय सुमङ्गलम् ॥* २४

ॐ

## शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृतः
श्रीसीतारामस्तवः गुरौ समर्पितः ॥

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीरामनवावरणस्तोत्रम् ॥

## *ध्यानम्*

*रामो ब्रह्मस्वयंजातो भावनावो भवापहः ।*
*नामतारकसत्सारो रामो रक्षतु मां सदा ॥*

श्रीरामः सत्यवाक्सत्यः श्रीत्यागराजसन्नुतः ।
श्रीददाशरथीपुण्यः श्रीसीतावरनाथसः ॥ १

श्रीरामं नादसान्निध्यं नादोपासनसुप्रियम् ।
रागसङ्गीतलोलं कं नादात्मकं प्रणौम्यहम् ॥ २

रामेण स्थापितो धर्मो रामेण स्फुरितः स्तवः ।
रामेण रक्षितं सर्वं रामेण नन्दिता नुतिः ॥ ३

रामाय पूजनं स्तोत्रं रामाय नादपूजनम् ।
रामाय सुस्वरागीतं श्रीरामाय नमो नमः ॥ ४

रामात्संजायते सर्वं रामात्सुस्वरसम्भवः ।[1]
रामाल्लभते सुज्ञानं रामाद्भवति सुस्वरः ॥[2] ५

रामस्य पूजनं श्रेष्ठं रामस्य कीर्तनं वरम् ।
रामस्य नाम सत्पुण्यं रामस्य करुणा स्थिरा ॥ ६

[1] सुस्वर–*Susvara vidyā*
[2] सुस्वरः – Sweet voice

रामे सँल्लीयते सर्वं रामे लीनः सुमानसः ।
रामे भक्तिः सुरक्षा च रामे भक्तिः सुमोक्षदा ॥ ७

राम त्वमसि मज्जीवो रामाहं शरणागता ।
राम क्षमस्व मे न्यूनं रामप्रभो प्रसीद मे ॥ ८

रामः सीतापतिर्विष्णुः रामं कीर्तय सर्वदा ।
रामेण बोधिता गीता रामाय शुभमङ्गलम् ॥ ९

रामात्प्रणवनादोत्थं रामस्य सुस्वरं शुभम् ।
रामे भक्तिस्तुतिःपूर्णा राम त्वय्यर्पिता स्तुतिः ॥ १०

कामक्रोधमदाज्ञानलोभमात्सर्यमोहहा ।
अहंकारतमःपाटो नवावरणपारकः ॥ ११

नवावरणसुस्तोत्रं श्रीरामसुकृपोद्भवम् ।
गुरुस्वामिकृपापूर्णं शिष्यापुष्पाभिवन्दनम् ॥ १२

मङ्गलं रामभद्राय सीतावराय मङ्गलम् ।
मङ्गलं त्यागराजाय रामभक्ताय मङ्गलम् ॥ १३

त्यागराजगुरुस्वामिशिष्यापुष्पासुगीतकम् ।
गुरुप्रेरणसङ्गीतं रामस्तोत्रं सुमङ्गलम् ॥ १४

ॐ

श्रीसीतारामपरब्रह्मणे नमो नमः ।

शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिशिष्यया पुष्पया
सुभक्त्या गुर्वनुग्रहेण कृतं श्रीरामनवावरणस्तोत्रं
श्रीरामभक्तगुरुस्वामिसन्निधौ समर्पितम् ॥

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीहनुमत्स्तवः ॥

*ॐ आञ्जनेयाय विद्महे। रामदूताय धीमहि। तन्नो यजः प्रचोदयात्॥*

पवमानसुतं वीरं बलिष्ठं बलदायकम् ।
पाथोधितारणं भीमं हनुमन्तं नमाम्यहम् ॥ १

अणिमाद्यष्टसिद्धिं च आरोग्यबुद्धिदायिनम् ।
असमानप्रभावं तं आञ्जनेयं नमाम्यहम् ॥ २

अवरं वरभक्ताग्र्यं प्राञ्जलिप्रार्थनावरम् ।
वररागलयज्ञं तं मरुज्जातं नमाम्यहम् ॥ ३

रामभक्तिमुदाप्लावं भक्तिसागरपारगम् ।
नामध्यानसमाधिस्थं मारुतिं प्रणमाम्यहम् ॥ ४

सीताराममहत्प्रेष्ठं सीताहृच्छिद्रशामनम् ।
सीतारामपरानिष्ठं महावीरं नमाम्यहम् ॥ ५

वाक्सौष्ठवातिनैपुण्यं महामेधाविलासिनम् ।
वाक्शब्दस्वरमाधुर्यं वातात्मजं नमाम्यहम् ॥ ६

गीतसुस्वरसानन्दं आनन्दबाष्पकण्ठिनम्।
अतिमाधुर्यगायन्तं वायुपुत्रं नमाम्यहम्॥ ७

रामनामरसानन्दं नामकीर्तनतन्मयम् ।
त्यागराजकृतिप्रीतं रामभक्तं नमाम्यहम् ॥ ८

नवव्याकरणाभिज्ञं तत्त्वसुज्ञानपण्डितम् ।
नवैतन्नुतिसान्निध्यं नमस्कुर्यं प्रणौम्यहम् ॥ ९

त्यागराजगुरुस्वामिशिष्यापुष्याकृपाकरम्।
कष्टाधिवारणं वन्दे इष्टेष्टिसिद्धिपूरणम् ॥ १०

वानरश्रेष्ठरत्नं तं रामभक्तिरसार्णवम् ।
पाठितश्लोकसङ्गीतं परमानन्दमङ्गलम् ॥ ११

*मङ्गलं रामदूताय कपीशाय सुमङ्गलम् ।*
*मङ्गलं भक्तिवन्द्याय आञ्जनेयाय मङ्गलम् ॥* १२

ॐ

## शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्यया कृतः
श्रीहनुमत्स्तवः गुरौ समर्पितः ॥

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीमदाञ्जनेयभुजङ्गप्रयातस्तोत्रम् ॥

*ॐ आञ्जनेयाय विद्महे। रामदूताय धीमहि। तन्नो यजः प्रचोदयात् ॥*

सदारामभक्तिप्रसारप्रडीनं सदातारकानन्दनामोपगङ्गम्।
सदाध्यानलीनं सदानामगानं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १

सदारामनामप्लवाह्लादरूपं सदारामनामाधरस्मेरवक्त्रम्।
सदारामगानातिमाधुर्यकण्ठं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ २

सदानामयोगं सदारामरागं सदाचित्तसम्पूर्णनामप्रभावम्।
सदाब्रह्मनिष्ठं वरज्ञानपूर्णं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ३

सदारामदासं महावीरवर्यं सदानामपेयूषपानप्रमत्तम्।
सुनामप्रहृष्टं सभक्ताग्रगण्यं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ४

सुनामस्वरालापबाष्पाकुलाक्षं सुसङ्गीतनामप्रभावस्वभावम्।
स्वरस्वादुनामोपभोग्यं सुभाग्यं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ५

ससूर्यप्रकाशं ससत्त्वप्रवाचं असाध्यप्रभावं सुसाध्यप्रमाणम्।
सदाध्यातरामस्वरूपप्रकाशं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ६

ससत्त्वं फलाशं सुमेधाविलासं सुसीतामनश्शोकनाशं प्रशान्तम्।
सुवेगं यजं तं भजे रामदूतं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ७

महद्ब्रह्मचर्यं मनोवाक्स्थरामं मनस्कायसञ्जीवनौषध्यधेयम्।
महीधारकंधारधारप्रतापं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ [1] ८

ससीतस्वरारामनामप्रगेयं ससङ्गीतसाहित्यविद्याप्रवीणम्।
सुसप्तस्वरानन्दनृत्याभिलास्यं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ९

हिमागप्रशान्तिस्वमाधुर्यगायं हिमानन्दगङ्गाप्लवाह्लादगेयम्।
हिमापूतरम्याष्ट्रध्यानस्थदेवं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १०

मनोगालनागीतरामाभिरामं सुरागानुरागं सुनामाभिजप्यम्।
मनोजस्वरागीतसीतावराप्तं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ ११

वरानन्दरामस्ववाचाभिनन्दं सरागप्रभाषं स्वरारामरामम्।[2]
कुरोगप्रणाशं वरारोग्यदायं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १२

सुसत्कार्यसिद्धिं सुसद्भक्तिबुद्धिं विरागत्ववृद्धिं सुरागप्रवृद्धिम्।
सुनादप्रवृत्तिं सुबोधं सुशक्तिं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १३

सुसङ्गीतवाणिं सुसत्पुष्पपाणिं कविस्फूर्तिरक्तिं कपिं रागहृष्टिम्।
सदासत्त्वदृष्टिं सदासक्तिपुष्टिं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १४

गुरुत्यागराजेन्द्रसद्गानलोलं तदाह्लादसन्नामगानप्रसन्नम्।
कृताञ्जल्यतिप्रेष्ठनामप्रलीनं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १५

[1] Glory of lifting mountain on the shoulder
[2] Whose voice was a delight to Sri Rama

गुरुत्यागराजेन्द्रशिष्योपगीतं सुपुष्योपहारं सुभक्तिप्रणीतम्।
मनोजस्तुतिस्फूर्तिपुष्पार्चितं तं सदात्राणभक्तं नमाम्याञ्जनेयम् ॥ १६

हरिश्रेष्ठरत्नं हरिप्रेष्ठभक्तं हरिस्मेरहृत्पद्मवासानुरागम्।
हरप्रीतनामप्रियं भक्तवर्यं हरांशं हनूमन्तशूरं नमामि ॥ १७

भुजङ्गप्रयातस्फुरद्भक्तिगीतं भुजङ्गप्रयातप्रगीतिप्रमोदम्।
भुजङ्गावतारानुजप्रेष्ठभक्तं भजे मारुतिं तं सभक्तं सुभद्रम् ॥ १८

सुभद्रं वरानन्दरामानुरागं सुभद्रं स्वरानन्दनामाभिगेयम्।
सुभद्रं वरारामरामोपसेवं सुभद्रं हनूमन्तधीरं भजेहम् ॥ १९

*श्रीसीतारामभक्ताय रामनामरताय च।*
*नामगानाभिलोलाय आञ्जनेयाय मङ्गलम् ॥*

ॐ

शुभमस्तु।

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया
कृतं श्रीमदाञ्जनेयभुजङ्गप्रयातस्तोत्रं गुरौ समर्पितम्।

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीकृष्णाष्टकम् ॥

*ॐ गीताचार्याय विद्महे। भक्तमित्राय धीमहि। तन्नः कृष्णः प्रचोदयात्।*

परमात्मस्वरूपाय नारायणाय विष्णवे ।
परिपूर्णावताराय श्रीकृष्णाय नमो नमः ॥ १

देवकीप्रियपुत्राय यशोदालालिताय च ।
वासुदेवाय देवाय नन्दनन्दाय ते नमः ॥ २

गोपिकानन्दलीलाय नवनीतप्रियाय च ।
वेणुगानाभिलोलाय राधाकृष्णाय ते नमः ॥ ३

गोविन्दाय मुकुन्दाय कंसादिरिपुदारिणे ।
मातापितृसुनन्दाय द्वारकापतये नमः ॥ ४

रुक्मिणीप्रियनाथाय रुग्मपीताम्बराय च ।
सत्यभामासमेताय सत्कामाय नमो नमः ॥ ५

पाण्डवप्रियमित्राय पाञ्चालीमानरक्षिणे ।
पार्थानुग्रहकाराय पार्थसारथये नमः ॥ ६

गीतोपदेशबोधाय विश्वरूपप्रकाशिने ।
वेदान्तसारसत्याय वेदनादाय ते नमः ॥ ७

सदासक्तसुरक्षाय सदामानसवासिने ।
सदात्मानन्दपूर्णाय श्रीकृष्णाय नमो नमः ॥ ८

*त्यागब्रह्मसुगीताय गीतपुष्पार्चिताय च ।*
*मनोवाक्कायपूर्णाय श्रीकृष्णाय सुमङ्गलम् ॥*

*कृष्णाष्टकमिदं पुण्यं कृष्णप्रेर्यं शुभप्रदम् ।*
*पुष्पार्चनसुपद्यं च श्रीकृष्णसुकृपावहम् ॥*

*त्यागराजगुरुस्वामिशिष्यापुषासमर्पितम् ।*
*कृष्णाष्टकं शुभस्तोत्रष् गुरुसान्निध्यपूरणम् ॥*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

*ॐ गीताचार्याय विद्महे। भक्तमित्राय धीमहि। तन्नः कृष्णः प्रचोदयात्।*

परानन्दप्रकाशाय नरानन्दावतारिणे ।
वरानन्दविकाशाय चिरानन्दाय ते नमः ॥ १

कारागृहसुजन्याय जन्मान्तररहिताय च ।
जन्मादिभयहाराय जनार्दनाय ते नमः ॥ २

देवकीवसुदेवस्वपुत्ररूपपरात्मने।
यशोदानन्दगोपस्वपुत्राभिपालिताय च ॥ ३

नीलनिर्मलगात्राय स्मितमोहनरूपिणे।
बाललीलाभिनन्दाय बालकृष्णाय ते नमः ॥ ४

करुणालयनेत्राय कंजातपूतदृष्टये ।
कारुण्यसत्कटाक्षाय केशवाय नमो नमः ॥ ५

नवनीतचुराश्चर्यलीलाविनोदनन्दिने ।
सुज्ञाननवनीताय ज्ञानरूप्याय ते नमः ॥ ६

मृत्तिकाशनबालास्यप्रपञ्चदर्शनाय च ।
लीलाचतुरकृष्णाय सर्वस्वाय नमो नमः ॥ ७

सुरारिवधलीलाय सुरगानार्चिताय च ।
साधुसागरचन्द्राय हृषीकेशाय ते नमः ॥ ८

गोवर्धनगिरीशाय कालिङ्गनर्तनाय च ।
गोपवृन्दसुरक्षाय गोविन्दाय नमो नमः ॥ ९

गोकुलानन्दवर्धाय गोपिकारमणाय च ।
गोपिकाह्लादगानाय गोपालाय नमो नमः ॥ १०

वेणुगानाभिलीनाय प्राणमिश्रितगीतये।
श्रोतृविस्मृतसर्वाय प्राणनाथाय ते नमः ॥ ११

जङ्गमस्थावरावेशदिव्यमाधुर्यवेणवे ।
मनोगालनगीताय गीतरागाय[1] ते नमः ॥ १२

सङ्गीतसुस्वरानन्दरागस्वरूपमूर्तये ।
रागतालगतिस्थाय स्थाणवे ते नमो नमः ॥ १३

गोपिकारासस्क्रीडासूचतत्त्वप्रपत्तये[2] ।
गोपिकाभक्तिवश्याय दामोदराय ते नमः ॥ १४

रुक्मिणीसत्यभामासभक्तिज्ञानाश्रयाय च ।
माधुर्यभक्तिपूज्याय अच्युताय नमो नमः ॥ १५

निजभक्त्यभिगम्याय भक्तहृत्स्थलवासिने ।
तुलसीदलतृप्ताय भक्तप्रियाय ते नमः ॥ १६

[1] The Melody of this song

[2] The One in whose *Rāsakrīḍā* sport with the *gopikā*s the principle of *prapatti* - *saraṇāgati* - surrender is hinted.

अतिसौलभ्यदैवाय लघुपूजनतोषिणे ।
तुलसीदलमालाय नारायणाय ते नमः ॥ १७

सुदामभक्तिनैवेद्यसुप्रीतिमित्रपोषिणे ।
पाण्डवापत्त्यपोहाय रक्षादैवाय ते नमः॥ १८

पञ्चेन्द्रियवशार्तिस्थसन्मनस्तापहारिणे ।
पञ्चपाण्डवभार्यार्तितापापहाय[3] ते नमः ॥ १९

द्रौपदीभक्तिवश्याय सतीमानसुरक्षिणे।
सदारक्षितकृष्णाय[4] क्षिप्रप्रसादिने नमः ॥ २०

दुश्शक्तिपीडितायुद्धसच्छक्तिजयकारिणे ।
भक्तपाण्डवतापार्तिकरकौरवनाशिने ॥ २१

निष्कामकर्मबोधाय कर्ममर्मप्रदर्शिने ।
स्वजीवकर्मयोगाय योगेश्वराय ते नमः ॥ २२

गीताबोधप्रमाणाय शरणार्थिनयाय च ।
प्रपन्नविजयानेत्रे भक्तसारथये नमः ॥ २३

भक्तियोगोपदेशाय सद्भक्तजीवमार्गिणे ।
निजभक्त्यपरोक्षाय सद्भक्तपालिने नमः ॥ २४

निष्कामभक्तितत्त्वस्वगीतोपदेशदर्शिने ।
शरणागतरक्षाय शरण्याय नमो नमः ॥ २५

[3] The allegory is Pañca Pāṇḍavas are the five *indriya*s and Draupadī is the virtuous mind
[4] कृष्णा = Draupadī

भक्तितत्त्वार्थगीताय सद्भक्तिज्ञानदीपिने ।
निष्कामभक्तिबोधाय गीतासाराय ते नमः ॥ २६

अनन्यशरणागन्तुरक्षणामोक्षदायिने ।
ज्ञानबोधस्वगीताय ज्ञानाचार्याय ते नमः ॥ २७

ज्ञानयोगप्रबोधाय सुज्ञानमार्गगामिने ।
सज्ज्ञानतत्त्वदर्शाय तत्त्वबोधाय ते नमः ॥ २८

हिम्यालयप्रशान्ताय नरनारायणाय च ।
सर्वानन्दप्रकाशाय श्रीकृष्णाय नमो नमः ॥ २९

गङ्गाप्रभवपादाय[5] बदरीधामपूतये।
गङ्गास्वरूपकृष्णाय अनन्ताय नमो नमः ॥ ३०

श्रीभागवतगेहाय पुण्यचारित्ररूपिणे ।
भागवतेष्टदैवाय भगधेयाय ते नमः ॥ ३१

बालालापं सुभक्त्युत्थं एतत्स्तोत्रं त्वदर्पणम् ।
नमस्तुभ्यं हरे कृष्ण पाहि मां शरणागताम् ॥ ३२

कृष्णालयमिदंस्तोत्रं श्रीकृष्णशुभदैवतम् ।
कृष्णरागस्फुरद्दीपं कृष्णमानसपूजनम् ॥ ३३

अनुरागाभिषेकं च रागपुष्पार्चनं शिवम् ।
न्यूनच्छिद्राणिधूपं च दीपाराधनदर्शनम् ॥ ३४

[5]Prostrations unto the Feet that are the Source of the Gaṅgā

शरणागतिनैवेद्यं कृष्णार्पणं सुगीतकम् ।
कृताञ्जलिनमस्कारं कृष्णप्रसादमङ्गलम् ॥ ३५

मङ्गलं योगकृष्णाय मूलाधाराय मङ्गलम् ।
मङ्गलं गीतकृष्णाय नादरामाय मङ्गलम् ॥ ३६

कृष्ण त्वमसिमच्छ्रायः कुरु दृष्टिप्रसादनम् ।
मङ्गलायनकृष्ण त्वं कुरु सम्पूर्णमङ्गलम् ॥ ३७

पूर्णत्वनयगीताय पूर्णानन्दप्रकाशिने।
पूर्णाभिव्याप्तसर्वाय पूर्णाय शुभमङ्गलम् ॥ ३८

त्यागब्रह्मगुरुस्वामिशिष्यापुष्पासुगीतकम्।
कृष्णस्तोत्रं महापुण्यं ब्रह्मानन्दं सुमङ्गलम् ॥ ३९

ॐ

## ॥ श्रीकृष्णमङ्गलाष्टकम् ॥

मङ्गलं हरिकृष्णाय भक्तवश्याय मङ्गलम् ।
मायाविनोदलीलाय शुभदाय सुमङ्गलम् ॥ १

वेदवेदान्तगुह्याय वेदशब्दस्वराय च ।
वेदोपनिषदर्थाय वेदसत्याय मङ्गलम् ॥ २

सामगानाभिपूज्याय सामगानस्वरूपिणे ।
सामजस्वरसङ्गीतवीणानादाय मङ्गलम् ॥ ३

वीणासुस्वरगीताय वीणागानार्चिताय च ।
वीणागीतप्रसन्नाय वेणुगानाय मङ्गलम् ॥ ४

नादविद्यादिमूलाय नादसुस्वरमोदिने ।
नादाय नादगम्याय नादनाथाय मङ्गलम् ॥ ५

नादाचलप्रदीपाय नादात्मने सुमङ्गलम् ।
नादोपासनवन्द्याय श्रीकृष्णाय सुमङ्गलम् ॥ ६

पूर्णभक्तिप्रसादाय पूर्णसौभाग्यदायिने ।
पूर्णज्ञानस्वरूपाय ज्ञानमोक्षाय मङ्गलम् ॥ ७

त्यागराजगुरुस्वामिसद्ज्ञानगानमूर्तये ।
शिष्यापुष्याकृतस्तोत्रपूर्णवासाय मङ्गलम् ॥ ८

शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिशिष्यया भक्तया पुष्यया
गुर्वनुग्रहेण कृतं श्रीकृष्णाष्टोत्तरशतनामस्तोत्रं श्रीकृष्णमङ्गलाष्टकसहितं गुरुसन्निधौ
समर्पितम् ।

ॐ

# ॥ श्रीकृष्णाष्टोत्तरशतनामावली ॥

ॐ परानन्दप्रकाशाय नमः । १

ॐ नरानन्दावतारिणे नमः । २

ॐ वरानन्दविकाशाय नमः । ३

ॐ चिरानन्दाय नमः । ४

ॐ कारागृहसुजन्याय नमः । ५

ॐ जन्मान्तरहिताय नमः । ६

ॐ जन्मादिभयहाराय नमः । ७

ॐ जनार्दनाय नमः । ८

ॐ देवकीवसुदेवस्वपुत्ररूपपरात्मने नमः । ९

ॐ यशोदानन्दगोपस्वपुत्राभिपालिताय नमः । १०

ॐ नीलनिर्मलगात्राय नमः । ११

ॐ स्मितमोहनरूपिणे नमः । १२

ॐ बाललीलाभिनन्दाय नमः । १३

ॐ बालकृष्णाय नमः । १४

ॐ करुणालयनेत्राय नमः । १५

ॐ कंजातपूतदृष्टये नमः । १६

ॐ कारुण्यसत्कटाक्षाय नमः । १७

ॐ केशवाय नमः । १८

ॐ नवनीतचुराश्चर्यलीलाविनोदनन्दिने नमः । १९

ॐ सुज्ञाननवनीताय नमः । २०

ॐ ज्ञानरूप्याय नमः । २१

ॐ मृत्तिकाशनबालास्यप्रपञ्चदर्शनाय नमः । २२

ॐ लीलाचतुरकृष्णाय नमः । २३

ॐ सर्वस्वाय नमः । २४

ॐ सुरारिवधलीलाय नमः । २५

ॐ सुरगानार्चिताय नमः । २६

ॐ साधुसागरचन्द्राय नमः । २७

ॐ हृषीकेशाय नमः । २८

ॐ गोवर्धनगिरीशाय नमः । २९

ॐ कालिङ्गनर्तनाय नमः । ३०

ॐ गोपवृन्दसुरक्षाय नमः । ३१

ॐ गोविन्दाय नमः । ३२

ॐ गोकुलानन्दवर्धाय नमः । ३३

ॐ गोपिकारमणाय नमः । ३४

ॐ गोपिकाह्लादगानाय नमः । ३५

ॐ गोपालाय नमः । ३६

ॐ वेणुगानाभिलीनाय नमः । ३७

ॐ प्राणमिश्रितगीतये नमः । ३८

ॐ प्राणनाथाय नमः । ३९

ॐ जङ्गमस्थावरावेशदिव्यमाधुर्यवेणवे नमः । ४०

ॐ मनोगालनगीताय नमः । ४१

ॐ गीतरागाय नमः । ४२

ॐ सङ्गीतसुस्वरानन्दरागस्वरूपमूर्तये नमः । ४३

ॐ रागतालगतिस्थाय नमः । ४४

ॐ स्थाणवे नमः । ४५

ॐ गोपिकाराससुक्रीडासूचतत्त्वप्रपत्तये नमः । ४६

ॐ गोपिकाभक्तिवश्याय नमः । ४७

ॐ दामोदराय नमः । ४८

ॐ रुक्मिणीसत्यभामासभक्तिज्ञानाश्रयाय नमः । ४९

ॐ माधुर्यभक्तिपूज्याय नमः । ५०

ॐ अच्युताय नमः । ५१

ॐ निजभक्त्यभिगम्याय नमः । ५२

ॐ भक्तहृत्स्थलवासिने नमः । ५३

ॐ तुलसीदलतृप्ताय नमः । ५४

ॐ भक्तप्रियाय नमः । ५५

ॐ अतिसौलभ्यदैवाय नमः । ५६

ॐ लघुपूजनतोषिणे नमः । ५७

ॐ तुलसीदलमालाय नमः । ५८

ॐ नारायणाय नमः । ५९

ॐ सुदामभक्तिनैवेद्यसुप्रीतिमित्रपोषिणे नमः । ६०

ॐ पाण्डवापत्त्यपोहाय नमः । ६१

ॐ रक्षादैवाय नमः । ६२

ॐ पञ्चेन्द्रियवशार्तिस्थसन्मनस्तापहारिणे नमः । ६३

ॐ पञ्चपाण्डवभार्यार्तितापापहाय नमः । ६४

ॐ द्रौपदीभक्तिवश्याय नमः । ६५

ॐ सतीमानसुरक्षिणे नमः । ६६

ॐ सदारक्षितकृष्णाय नमः । ६७

ॐ क्षिप्रप्रसादिने नमः । ६८

ॐ दुश्शक्तिपीडितायुद्धसच्छक्तिजयकारिणे नमः । ६९

ॐ भक्तपाण्डवतापार्तिकरकौरवनाशिने नमः । ७०

ॐ निष्कामकर्मबोधाय नमः । ७१

ॐ कर्ममर्मप्रदर्शिने नमः । ७२

ॐ स्वजीवकर्मयोगाय नमः । ७३

ॐ योगेश्वराय नमः । ७४

ॐ गीताबोधप्रमाणाय नमः । ७५

ॐ शरणार्थिनयाय नमः । ७६

ॐ प्रपन्नविजयानेत्रे नमः । ७७

ॐ भक्तसारथये नमः । ७८

ॐ भक्तियोगोपदेशाय नमः । ७९

ॐ सद्भक्तजीवमार्गिणे नमः । ८०

ॐ निजभक्त्यपरोक्षाय नमः । ८१

ॐ सद्भक्तपालिने नमः । ८२

ॐ निष्कामभक्तितत्त्वस्वगीतोपदेशदर्शिने नमः । ८३

ॐ शरणागतरक्षाय नमः । ८४

ॐ शरण्याय नमः । ८५

ॐ भक्तितत्त्वार्थगीताय नमः । ८६

ॐ सद्भक्तिज्ञानदीपिने नमः । ८७

ॐ निष्कामभक्तिबोधाय नमः । ८८

ॐ गीतासाराय नमः । ८९

ॐ अनन्यशरणागन्तुरक्षणामोक्षदायिने नमः । ९०

ॐ ज्ञानबोधस्वगीताय नमः । ९१

ॐ ज्ञानाचार्याय नमः । ९२

ॐ ज्ञानयोगप्रबोधाय नमः । ९३

ॐ सुज्ञानमार्गगामिने नमः । ९४

ॐ सज्ज्ञानतत्त्वदर्शाय नमः । ९५

ॐ तत्त्वबोधाय नमः । ९६

ॐ हिम्यालयप्रशान्ताय नमः । ९७

ॐ नरनारायणाय नमः । ९८

ॐ सर्वानन्दप्रकाशाय नमः । ९९

ॐ श्रीकृष्णाय नमः । १००

ॐ गङ्गाप्रभवपादाय नमः । १०१

ॐ बदरीधामपूतये नमः । १०२

ॐ गङ्गास्वरूपकृष्णाय नमः । १०३

ॐ अनन्ताय नमः । १०४

ॐ श्रीभागवतगेहाय नमः । १०५

ॐ पुण्यचारित्ररूपिणे नमः । १०६

ॐ भागवतेष्टदैवाय नमः । १०७

ॐ भगधेयाय नमः । १०८

ॐ श्रीकृष्णाय परब्रह्मणे नमो नमः

ॐ

शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिशिष्यया भक्तया पुष्पया

गुर्वनुग्रहेण ग्रथिता श्रीकृष्णाष्टोत्तरशतनामावली श्रीकृष्णशुभचरणकमले समर्पिता ।

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ श्रीश्रीनिवासस्तोत्रम् ॥

*ॐ श्रीनिवासाय विद्महे । लक्ष्मीवराय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥*

श्रीनिवासं सलक्ष्मीकं वेङ्कटाद्रिशुभालयम् ।
सप्ताचलप्रभासन्तं लक्ष्मीकान्तं नमाम्यहम् ॥ १

आनन्दनिलयावासं परमानन्दसँल्लयम् ।
अचलानन्दसंवर्धं लक्ष्मीकान्तं नमाम्यहम् ॥ २

पतिताश्रयपादाब्जं शरणार्थिकृपाकरम् ।
कराभयप्रदं वन्दे लक्ष्मीकान्तं नमाम्यहम् ॥ ३

मुखतेजोजितार्कं तं कारुण्यमयवीक्षितम् ।
स्मिताननमनोहारं लक्ष्मीकान्तं नमाम्यहम् ॥ ४

पद्मावतीपतिं श्रीदं मनःपद्मसुवासनम् ।
पद्मनेत्रविमोक्तारं लक्ष्मीकान्तं नमाम्यहम् ॥ ५

सर्वाभीष्टवराप्तं तं सर्वव्यापिपरार्थकम् ।

सर्वपापविनाशं च लक्ष्मीकान्तं नमाम्यहम् ॥ ६

षड्शत्रुसूदनं मालं दहरात्मलयावहम् ।
कलिप्रत्यक्षदैवं तं लक्ष्मीकान्तं नमाम्यहम् ॥ ७

वसुदं वासुदेवं तं लक्ष्मीकटाक्षकारकम् ।
आयुरारोग्यसम्पत्तिं लक्ष्मीकान्तं नमाम्यहम् ॥ ८

रोगहं वरदं शान्तं वरसप्तगिरीश्वरम् ।
वेङ्कटेशसुनामानं लक्ष्मीकान्तं नमाम्यहम् ॥ ९

नागाचलप्रभावं तं वररागलयस्थितम् ।
स्वररागसुधामिष्टं लक्ष्मीकान्तं नमाम्यहम् ॥ १०

सप्तस्वरप्रियारामं सङ्गीतस्वरपूजितम् ।
त्यागब्रह्मसुसङ्गीतं लक्ष्मीकान्तं नमाम्यहम् ॥ ११

*मङ्गलं श्रीनिवासाय लक्ष्मीपाय सुमङ्गलम् ।*
*त्यागब्रह्मसुगेयाय पुष्पार्चिताय मङ्गलम् ॥* १२

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ श्रीरङ्गनाथाष्टकम् ॥

*ॐ रङ्गनाथाय विद्महे । क्षेत्रज्ञाय च धीमहि । तन्नः श्रीपः प्रचोदयात् ॥*

महाविष्णुं सदात्राणं भक्ताभयवरप्रदम् ।
सुधावीक्षं सलक्ष्मीकं रङ्गनाथं नमाम्यहम् ॥ १

भूवैकुण्ठनिवासं तं श्रीरङ्गक्षेत्रवैभवम् ।
मुत्याभासविकासं सं रङ्गनाथं नमाम्यहम् ॥ २

मुत्याङ्गिसेवसंहर्षं नेत्रोत्सवसुवैभवम् ।
एकादशीमहोत्साहं रङ्गनाथं नमाम्यहम् ॥ ३

नागराजसुशैय्यं तं कारुण्यनेत्रसुस्मितम् ।
पाददर्शनसन्मोक्षं रङ्गनाथं नमाम्यहम् ॥ ४

विभीषणप्रतिष्ठं तं पुराणालय संस्थितम् ।
श्रीरङ्गक्षेत्रमाहात्म्यं रङ्गनाथं नमाम्यहम् ॥ ५

रामावतारलीलस्वं कावेरीतीरवासनम् ।
गुरुकीर्तनसन्नूतं रङ्गनाथं नमाम्यहम् ॥ ६

त्यागराजगुरुस्वामिकाम्भोजरागकीर्तितम् ।
रङ्गशायिहरिं वन्दे बहुकीर्तनसंस्तुतम् ॥ ७

मङ्गलं रङ्गनाथाय सलक्ष्मीकाय मङ्गलम् ।
मङ्गलं गुरुगेयाय श्रीरामाय[1] सुमङ्गलम् ॥ ८

त्यागराजगुरुस्वामिशिष्यापुष्यासमर्पितम् ।
गुरुस्फूर्तिस्फुटस्तोत्रं रङ्गनाथाष्टकं शुभम् ॥

ॐ

## शुभमस्तु

इति सद्गुरुश्रीत्यागराजस्वामिशिष्यया भक्तया पुष्यया श्रीवैकुण्ठैकादशीदिने
गुरौ समर्पितम् गुरुस्फूर्तिस्फुटस्तोत्रम् श्रीरङ्गनाथाष्टकं ॥

[1]श्रीराम – Srī Rāma / the Delight of Śrī/Lakṣmī

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीलक्ष्मीनृसिंहस्तोत्रम् ॥

*ॐ नारसिंहाय विद्महे। हरिणीपाय धीमहि। तन्नो हरिः प्रचोदयात्॥*

नमः श्रीनारसिंहाय[1] नमो हैमालयाय च ।
नमो ज्योतिस्स्वरूपाय नमः श्रीविष्णवे नमः॥ १

नमो ज्योतिर्मठस्थाय स्वयम्भूयोगमूर्तये ।
योगासन्नसुनिष्ठाय नृसिंहाय नमो नमः॥ २

प्रशान्तमन्दिरस्थाय शालग्रामशिलाय च ।
तपोवर्धनरूपाय नृसिंहाय नमो नमः ॥ ३

शैलावृतसुगेहाय शैलमध्यप्रशान्तये ।
शैलगङ्गासुमालाय नृसिंहाय नमो नमः ॥ ४

शैलोत्तुङ्गविराजाय शैलसारगृहाय च ।
शैलराजाधिराजाय नृसिंहाय नमो नमः ॥ ५

आचार्यशङ्करारम्यपूजागृहनिवासिने ।

[1] This Stotram is on Lord Lakshminarasimha of Jyothirmath (Joshimath) - en route Badrinath

ध्यानयोगप्रतिष्ठाय ज्ञानदाय नमो नमः ॥ ६

करावलम्बरक्षाय[2] करालभवतारिणे ।
तपोहिम्याधिरोपाय सदानन्दाय ते नमः ॥ ७

आचार्यत्यागराजस्वगेयनाटकगीतये[3]।
शिष्यापुष्पाहिमागीतगद्यामोदाय[4] ते नमः ॥ ८

नमो लक्ष्मीनृसिंहाय नमोऽभयवराय च ।
नमो मोक्षप्रदात्रे च नम ओं ब्रह्मणे नमः ॥ ९

*मङ्गलं नारसिंहाय मङ्गलायनमूर्तये ।*
*मायाम्बुदसमीराय मासमेताय मङ्गलम् ॥ १०*

ॐ

शुभमस्तु

[2]Refers to an episode in the introduction to the author's *Himalayagadyam*
[3]Ref. to Sadguru Sri Thyagabrahmam's musical opera Prahlada Bhakti Vijayam
[4]Ref. to author's *Himalayagadyam*

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीलक्ष्मीनारायणभुजङ्गप्रयातस्तोत्रम् ॥

*ॐ नारयाणाय विद्महे। फणितल्पाय धीमहि। तन्नः श्रीपः प्रचोदयात्॥*

*ध्यानम्*

*लक्ष्मीनारायणं विष्णुं क्षीरसागरशायिनम् ।*
*भुजङ्गराजराजं तं श्रीहरिं प्रणमाम्यहम् ॥*

सुदुग्धार्णवोरङ्गशय्यातिरम्यं सहस्राननाशुभ्रभोगीन्द्रतल्पम् ।
सुहासातिनीलप्रकाशाननाभं सलक्ष्मीकनारायणं तं नमामि ॥ १

सुपीताम्बराभाससौवर्णकान्तिं सुपीताभसौवर्णलक्ष्मीधृतांघ्रिम् ।
सुनेत्रातिलावण्यकारुण्यशान्तं सलक्ष्मीकनारायणं तं नमामि ॥ २

सुशङ्खं च चक्रं च धारद्विपाणिं सदानुग्रहालम्बपाणिद्वयं च ।
कुसंसारतापापहानन्दधेयं सलक्ष्मीकनारायणं तं नमामि ॥ ३

सदास्मेरवक्त्रं स्फुटाम्भोजवक्त्रं स्मितानन्द नेत्रं ललाटातिशोभम् ।
सुनासप्रवातप्रपञ्चस्थवायुं सलक्ष्मीकनारायणं तं नमामि ॥ ४

सुमाधुर्यनादोद्भवाचारुकण्ठं सुपिङ्गाशमुक्तावलीभूषकण्ठम् ।
उरःस्मेरसौवर्णलक्ष्मीसुकान्तिं सलक्ष्मीकनारायणं तं नमामि ॥ ५

सुकर्णालसत्काञ्चनाभूषहीरं शिरोल्लासरत्नावलिद्योतफालम् ।
सुभासाननादीप्रतेजस्स्वरूपं सलक्ष्मीकनारायणं तं नमामि ॥ ६

सुगङ्गाप्रवाहोद्भवापुण्यपादं नतोद्धारणापूज्यपादद्वयं च ।
सुलक्ष्मीवरश्रीकराभूषपादं सलक्ष्मीकनारायणं तं नमामि ॥ ७

सुनेत्रासुभूषासुमालासुफाला सुवर्णासुपर्णासुभाषासुलासा-
सुलक्ष्मीसपत्नीसपत्नीकविष्णुं सलक्ष्मीकनारायणं तं नमामि ॥ ८

शिवानन्दलास्यप्रसन्नातिसौम्यं शिवाजप्तनामस्मरानन्दपुण्यम् ।
स्तुतिस्तोत्रसुग्रीवगायन्तभव्यं सलक्ष्मीकनारायणं तं नमामि ॥ ९

भुजङ्गप्रयातप्रगीतप्रशान्तं भुजङ्गप्रयातप्रगेयप्रसादम् ।
भुजङ्गे शयानं सुलक्ष्मीसमेतं भजेहं हरिं तं परार्थं सुभद्रम् ॥ १०

सुभद्रं सलक्ष्मीकनारायणाय सुभद्रं गुरुत्यागराजार्यगाय ।
सुभद्रं सुपुष्पावलिस्फूर्तिगाय सुभद्रं सुमाङ्गल्यदात्रे सुभद्रम् ॥ ११

*नारायणाय देवाय क्षीरसागरशायिने ।*
*आदिशेषविकासाय सलक्ष्मीकाय मङ्गलम् ॥*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीनटराजस्तवः ॥

*ॐ नटराजाय विद्महे। नटानन्दाय धीमहि। तन्नः शिवः प्रचोदयात्॥*

*नमः शिवाय रुद्राय उमापाय नमो नमः ।*
*आनन्दताण्डवानन्दनटराजाय ते नमः ॥*

चिदम्बरप्रनृत्यकं चिदात्मबोधनर्तनम् ।
नदत्पदस्थझंकृतं सदात्मलीनताण्डवम् ॥ १

सुताललास्यलासकं सुवक्त्रगारसस्वरम् ।
सुकाव्यलासरासकं सभव्यनृत्यताण्डवम् ॥ २

सुनादनन्दताण्डवं चिदग्निमण्डलावृतम् ।
प्रकृत्यनुप्रवेशनं प्रकाशमण्डलं भवम् ॥ ३

झणत्करस्थडामरं करान्यपावकज्वलम् ।
वराभयप्रदोत्करं करस्फुरत्सुकाञ्चनम् ॥ ४

पदोत्थितं सुताण्डवं मृगारिचर्ममध्यमम् ।
सुवर्णलासवासनं नटप्रडीनवासनम् ॥ ५

गलप्रलाससर्पकं सुकर्णलासकुण्डलम् ।
स्मितोष्ठरञ्जनं मृडं सुनेत्रदीप्तिनर्तनम् ॥ ६

ललाटनेत्रशिक्षकं अलीकभस्मलेपनम् ।
जटार्धचन्द्रशोभनं जटाहिमण्डलं हरम् ॥ ७

सुमौलिगङ्गिकानटं सुगङ्गिकाहिमप्रियम् ।
हिमाम्बुवर्षगङ्गिकं नटोल्लसत्सुगङ्गिकम् ॥ ८

नमामि तं नटप्रियं नमामि चित्सभेश्वरम् ।
नमामि सृष्टिमण्डलं नमाम्युमामहेश्वरम् ॥ ९

उमेश्वराय मङ्गलं नटोत्तमाय मङ्गलम् ।
सुताण्डवाय मङ्गलं चिदम्बराय मङ्गलम् ॥ १०

शिवस्य ताण्डवस्तवं गुरुप्रसादकीर्तितम् ।
विकासपुष्पवासनं भवापहं भगप्रदम् ॥ ११

शिवस्य सत्कृपालयं सुगालयं मनोलयम्।
सदा पठेद् वरप्रदं सदा सुमङ्गलावहम् ॥ १२

*मङ्गलं चित्सभेशाय शक्तिनाथाय मङ्गलम् ।*
*मङ्गलं नटराजाय त्यागराजाय मङ्गलम् ॥* १३

*त्यागराजगुरुस्वामिशिष्यापुष्पाप्रकीर्तितम् ।*
*नटराजस्तवस्तोत्रं नटराजकृपावहम् ॥* १४

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ सदाशिवप्रमाणिका ॥

*ॐ सदाशिवाय विद्महे । गङ्गाधराय धीमहि । तन्नो भद्रः प्रचोदयात्॥*

सदाशिवं मुदामयं सुधाकरप्रभासखम् ।
सदा भजे सुगङ्गिकं स्वरात्मकं स्वरासरम् ॥ १

सुपञ्चवक्त्रगारसं गुरुप्रगीतकीर्तनम् ।
सुपञ्चवारिवासनं गुरुप्रगेयरासकम् ॥ २

सुनृत्यलासगालयं शिवामयं शिवासहम् ।
सुशंकरं वशंकरं भयापहं यमापहम् ॥ ३

कुकालवैरिणं भवं भवाब्धितारिणं भगम् ।
सुरामनामतन्मयं सुनामकीर्तनालयम् ॥ ४

सरीगमापधानिसासुसप्तनादमोदितम्।
नमामि तं शिवात्मकं वरप्रदं शुभप्रदम् ॥ ५

सुपुष्पमालिकार्पणं सुपुष्पनादसौरभम्।
प्रमाणपुष्पवर्षणं प्रमाणितातिमङ्गलम् ॥ ६

सदाशिवप्रमाणिका सदाशिवप्रचोदिता।
सदाप्रमोददायिका सदाशिवा सुमङ्गला ॥ ७

सदाशिवाय मङ्गलं उमावराय मङ्गलम्।
स्वरोदयाय मङ्गलं सुभेषजाय मङ्गलम् ॥ ८

*सद्गुरुत्यागराजार्यशिष्यापुष्पासुगीतिका ।*
*सदाशिवगुरुप्रीता सदामङ्गलदायिका ॥* ९

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीसुब्रह्मण्यस्तवः ॥

*ॐ कृत्तिकेशाय विद्महे । गाङ्गेयाय च धीमहि । तन्नः स्कन्दः प्रचोदयात्॥*

शैलजाभवपुत्राय विघ्नेश्वरानुजाय च ।
ज्ञानस्कन्दाय कन्दाय सुब्रह्मण्याय ते नमः ॥ १

षडाक्षरसुमन्त्राय षड्गन्त्रुपटदारिणे ।
षड्गाधारसुरागातिचारुगीताय ते नमः॥ २

षडाचलनिवासाय षण्मुखाय सुखाय च ।
प्रणवार्थस्वरूपाय पितृबोधाय ते नमः॥ ३

कृत्तिकाशुभताराय कृतिरत्नस्तुताय च ।
श्रीदीक्षितगुरुस्वामिकीर्तिताय नमो नमः॥ ४

नारायणस्वसीयाय दिव्यलावण्यतेजसे ।
श्रीवल्लीदेवसेनासुकलत्राय नमो नमः ॥ ५

शिखिवाहनसौम्याय श्रीमद्गुरुगुहाय च ।
अज्ञानध्वान्तसूर्याय स्वामिनाथाय ते नमः॥ ६

गुणातीतस्वरूपाय ज्ञानसत्फलदाय च ।
गुह्याकाराय साराय गुरवे ब्रह्मणे नमः ॥ ७

तामसासुरहाराय सत्त्वसत्यप्रकाशिने ।
आयुरारोग्यकाराय कुमाराय नमो नमः ॥ ८

त्यागराजगुरुस्वामिसत्कीर्तननुताय च ।
[1]पुष्पवल्लीसुपालाय नादलोलाय ते नमः ॥ ९

*मङ्गलं श्लोकनाथाय सोमस्कन्दाय मङ्गलम् ।*
*मङ्गलं ज्ञानदेवाय सुब्रह्मण्याय मङ्गलम् ॥* *१०*

ॐ

शुभमस्तु

[1] Author

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीगङ्गादशकम् ॥

*ॐ मोक्षोपायाय विद्महे । माङ्गल्यायै च धीमहि । तन्नो गङ्गा प्रचोदयात् ॥*

*ध्यानम्*

*नमस्तुभ्यं वरे गङ्गे मोक्षसौमङ्गलावहे ।*
*प्रसीद मे नमो मातर्वस मे सह सर्वदा ॥*

गङ्गा भागीरथी माता गोमुखी सत्सुदर्शिनी ।
भगीरथतपःपूर्णा गिरीशशीर्षवाहिनी ॥ १

गगनावतरा गङ्गा गम्भीरस्वरघोषिणी ।
गतितालसुगाप्लावा गमनाद्भुतगालया ॥ २

गङ्गा हिमापगा दिव्या गमनारम्भगोमुखी ।
गङ्गोत्तरी तपस्तीर्था गभीरदरिवाहिनी ॥ ३

गङ्गाहरिशिलारूपा गहनान्तरघर्घरा ।
गमनोत्तरकाशी च गतिनिम्नसुसङ्गमा ॥ ४

गङ्गाभागीरथीयुक्तागम्भीरालकनन्दभा ।
गङ्गा देवप्रयागा मा गभीरार्चितराघवा ॥ ५

गतनिम्नहृषीकेशा गङ्गाहरिपदोदका ।
गङ्गागतहरिद्वारा गगनागसमागता ॥ ६

गतिप्रयागसुक्षेत्रा गङ्गार्कतनयायुता ।
गतमानवपापा च गङ्गा काशीपुरागता ॥ ७

गहनाघविनाशा च गत्युत्तमसुखावनी ।
गतिकालीनिवासा च गङ्गासागरसङ्गता ॥ ८

गङ्गा हिमसमावाहा गम्भीरनिधिसालया ।
गद्यपद्यनुतागीता गद्यपद्यप्रवाहिणी ॥ ९

गानपुष्पार्चिता गङ्गा गाहितागह्वगह्वरा ।
गायगाम्भीर्यमाधुर्या गायमाधुर्यवाग्वरा ॥ १०

नमस्ते तुहिने गङ्गे नीहारमयनिर्झरि ।
गङ्गासहस्रवाग्रूपे नमस्ते मानसालये ॥ ११

*मङ्गलं मङ्गलाधात्र्यै महापुण्यसुवाक्श्रियै ।*
*मनःपावननाम्न्यै च गङ्गामात्रे सुमङ्गलम् ॥* *१२*

*मङ्गलं ते शुभे गङ्गे मङ्गलं मातृदेवते ।*
*मङ्गलं मम सर्वस्वे मङ्गलं मङ्गलायने ॥* *१३*

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ खगङ्गाभुजङ्गप्रयातम् ॥

भुजङ्गप्रयातोर्मिवाहप्रवाहां भुजङ्गप्रशान्तप्रसादप्रसाराम्।
भुजङ्गाधराजस्रधाराभिषेकां भजे स्वर्गगङ्गां सुवर्गापवर्गाम्॥ १

सदादर्शनास्फोटकाव्याभिनव्यां स्वसौन्दर्यसंस्फूर्तिशैलीगभीराम्।
सतालस्वरोंकारसानन्दलास्यां भजे नादगङ्गां स्वरामोददर्शाम्॥ २

खगङ्गां गगङ्गां मुमुक्षुत्वधेयां वरस्नानसत्पानसज्ज्ञानबोधाम्।
जलापूतपुण्यां महापूतनाम्नीं भजे रागगङ्गां लयावेगवाहाम्॥ ३

वरानन्दकन्दां स्वरानन्दसारां चिदानन्दसद्रां चिरानन्दगाङ्गाम्।
मदानन्दगेयां सदानन्दगेहां भजे ज्ञानगङ्गां अनन्तादिशक्तिम्॥ ४

हिमांशुप्रभासप्रवाहप्रहर्षां सुरौप्यातिशोभाम्बुशुभ्रप्रवाहाम्।
हिमागप्रभावातिसत्त्वप्रकाशां भजे सत्यगङ्गां परब्रह्मकाशाम्॥ ५

हिमाह्लादगङ्गां नमाम्यापवर्यां क्षपानाथसंस्मेरचारुस्वरूपाम् ।
सलालित्यवैचित्र्यचित्राभिलेखां भजे हिम्यगङ्गां मनश्शान्तिसौख्याम्॥ ६

सुकाव्यार्पणानन्दसम्प्राप्तिभव्यां सुमाङ्गल्यसद्भाग्यसम्पत्तिभोग्याम्।
सुगानप्रसन्नां हृदब्जे निषण्णां भजे दिव्यगङ्गां मदानुग्रहाम्बाम्॥ ७

गुरुत्यागरजेन्द्रसङ्गीतगङ्गां सुपुष्पाभिषेकप्रमोदप्रसादाम्।
इहानन्दभद्रां परज्ञानमोक्षां भजे नित्यगङ्गां वरां मङ्गलाभाम्॥ ८

खगङ्गे भुजङ्गप्रयाते सुभद्रं कविप्राणसंस्फूर्तिपूते सुभद्रम्।
सुरागस्फुरद्रागयाते सुभद्रं सुभद्रं सुमाङ्गल्यदे ते सुभद्रम्॥ ९

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ श्रीगङ्गाप्रमाणिकास्तुतिः ॥

हिमालयस्य पुत्रिका हिमाहिमासराप्लवा ।
हिमातिशुभ्रसारका हिमापगा सुगङ्गिका ॥ १

हिमालयस्थदैविका प्रमाणितातिपूतका ।
हिमप्रपातकाव्यझा सुकाव्यझाप्रसादिका ॥ २

रमापपादरासका उमापशेखरोदका ।
रमारमारमाप्लवा उमारमाभिरामका ॥ ३

सनादसारसारगा निनादसुस्वराशुगा ।
सुनादसार्चिताभगा ननादगास्वरापगा ॥ ४

सरीगमापधानिसास्वरार्चनातिमोदिता ।
गगाममाधनीसरी स्वरासरा सुरापगा ॥ ५

स्वराक्षरा क्षराक्षरा क्षराक्षरा सुवाक्क्षरा ।
सुभाक्षरा शुभाक्षरा सुकाक्षरा सुखाक्षरा ॥ ६

सुरागरागरागगा सदाशिवाशिरोदका ।
सुधाप्लवातिमोदका सुराप्लवा शुभोदका ॥ ७

भवाभवा भवप्रिया वरप्रदाभगापगा ।
सदामुदाकराम्बिका सदार्चिता पराम्बिका ॥ ८

सरागगीतमातृका सुरागपुष्पमालिका ।
वरागरक्तिलास्यका विरागमुक्तिदायिका ॥ ९

कुकर्मदारिणीश्वरी विमुक्तिदायिनी जनी ।
सुवासिनीसुपूजिता सुकौशला सुमङ्गला ॥ १०

गुरुप्रसादकीर्तिता गुरुप्रमोदगीतिका ।
गुरुप्रचोदनार्चिता गुरुस्वयंकृतार्चना ॥ ११

*सुमङ्गलं सुगङ्गिके प्रमाणिकास्तुतिस्फुरे ।*
*सुरागताललास्यके सुवाणि ते सुमङ्गलम्॥* १२

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ हिमालयस्तुतिः ॥

*ॐ हिमालयाय विद्महे। गङ्गाभवाय धीमहि। तन्नो हरिः प्रचोदयात्॥*

हिमालयप्रभावायै हिमनद्यै नमो नमः।
हिमसंहतिभावायै हिमवत्यै नमो नमः ॥ १

अलकापुरिनन्दायै अतिभायै नमो नमः ।
भवापोहनपुण्यायै भागीरथ्यै नमो नमः ॥ २

सङ्गमक्षेत्रपावन्यै गङ्गामात्रे नमो नमः ।
देवप्रयागदिव्यायै देवनद्यै नमो नमः ॥ ३

देवदेवविनूतायै देवभूत्यै नमो नमः ।
देवाधिदेवपूज्यायै गङ्गादेव्यै नमो नमः ॥ ४

नमः श्रीरामभद्राय गङ्गातीरालयाय च ।
सर्वोत्कृष्टाय शान्ताय गभीराय नमो नमः ॥ ५

भागीरथ्यलकानन्दासङ्गमाभिमुखाय च ।
देवप्रयागदेवाय रघुनाथाय ते नमः ॥ ६

नमस्सीतावराजाय रामचन्द्राय विष्णवे ।
सर्वशक्तिप्रदात्रे च सर्वोन्नताय ते नमः ॥ ७

रुद्रप्रयागनाथाय नारदागीतशम्भवे ।
मन्दाकिन्यलकानन्दासङ्गमस्थाय ते नमः ॥ ८

मन्दाकिन्यभिषिक्ताय केदारलिङ्गमूर्तये ।
स्वयंभूशैलरूपाय शिवाय ओं नमो नमः ॥ ९

श्रीयोगनरसिंहाय ज्योतिर्मठस्थिताय च ।
करावलम्बदैवाय श्रीलक्ष्मीपतये नमः ॥ १०

बदरीकाश्रमस्थाय नारायणाय विष्णवे ।
तपोभूमिप्रशान्ताय योगनिष्ठाय ते नमः ॥ ११

बदरीवननाथाय नरनारायणाय च ।
नरोद्धारणलीलाय नरानन्दाय ते नमः ॥ १२

हिमगङ्गालकानन्दाभिषिक्तयोगमूर्तये ।
बदरीश्रीमहालक्ष्मीतपोनाथाय ते नमः ॥ १३

हैमशेखरवृत्ताय नीलकण्ठनुताय च ।
वसुधाराप्रवाहाय पुराणाय नमो नमः ॥ १४

गीताचार्याय कृष्णाय वाचामगोचराय च ।
हिमालयप्रशान्तिस्थपरानन्दाय ते नमः ॥ १५

सदालीनमनस्स्थाय सदानन्दप्रशान्तये ।
सदात्मानन्दबोधाय श्रीकृष्णाय नमो नमः ॥ १६

*मङ्गलं हिमरागायै गङ्गामात्रे सुमङ्गलम् ।*

*मङ्गलं शिवसद्धाम्ने गङ्गाधराय मङ्गलम् ॥* १७

*मङ्गलं वासुदेवाय बदरीवनमालिने।*
*मङ्गलं श्रीसमेताय नारायणाय मङ्गलम् ॥* १८

*मङ्गलं पूर्णशोभाय हिम्याचलाय मङ्गलम् ।*
*मङ्गलं सौम्यगङ्गाय मोक्षधाम्ने सुमङ्गलम् ॥* १९

*मङ्गलं रागहिम्याय नादगङ्गाय मङ्गलम् ।*
*मङ्गलं त्यागराजाय पुष्पार्चिताय मङ्गलम् ॥* २०

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः।

# ॥ सूर्यस्तुतिः ॥

*ॐ ज्योतिर्मयाय विद्महे । रश्मिमालाय धीमहि । तन्नः सूर्यः प्रचोदयात् ॥*

सूर्यनारायणं देवं सर्वलोकप्रकाशकम् ।
ज्योतिर्मयस्वरूपं तं भानिधिं प्रणमाम्यहम् ॥ १

श्रीरामपूजितं भानुं तमोराक्षसहारकम् ।
शुद्धसत्त्वप्रबोधं तं भानिधिं प्रणमाम्यहम् ॥ २

चक्षुर्दीपप्रकाशं च अन्तश्चक्षुर्विकाशकम् ।
शिराशिरदृढीकारं भानिधिं प्रणमाम्यहम् ॥ ३

जीवदं जीवसंरक्षं जीवशक्तिप्रदीपकम् ।
जीवनाधाररश्मिं तं भानिधिं प्रणमाम्यहम् ॥ ४

आरोग्याधिपतिं वन्दे व्याध्याधिभयनाशकम् ।
दौर्बल्यापोहनं मित्रं भानिधिं प्रणमाम्यहम् ॥ ५

पाटिताज्ञानकूहं तं ज्ञानप्रकाशभास्करम् ।
तेजस्करं सुतेजार्कं भानिधिं प्रणमाम्यहम् ॥ ६

सप्ताश्वरथयानं तं सत्त्वश्वेतप्रकाशिनम् ।
सप्तश्लोकप्रसन्नं च भानिधिं प्रणमाम्यहम् ॥ ७

हिमसंहतिविद्रावं गङ्गाप्रवाहभासुरम् ।
हिमशेखरसाभासं भानिधिं प्रणमाम्यहम् ॥ ८

उषोगाङ्गेयरागाभं संध्यानानाच्छविद्युतिम् ।
ध्यानप्रशान्तिहिम्याष्ट्रं भानिधिं प्रणमाम्यहम् ॥ ९

मङ्गलं सूर्यदेवाय आदित्याय सुमङ्गलम् ।
मङ्गलं द्युतिमालाय सारङ्गाय सुमङ्गलम् ॥ १०

मयेति कीर्तितादित्य मह्यं देहि निरामयम् ।
मङ्गलायनभाकोश मह्यं देहि सुमङ्गलम् ॥ ११

*त्यागराजगुरुस्वामिशिष्यापुष्पासुगीतकम् ।*
*सूर्यनारायणस्तोत्रं आयुरारोग्यदं शुभम् ॥* १२

ॐ

शुभमस्तु

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ ज्योतिर्लक्ष्मीस्तोत्रम् ॥

*ॐ ज्योतिर्लक्ष्म्यै च विद्महे। दीपद्युत्यै च धीमहि। तन्नो ज्योतिः प्रचोदयात्॥*

ज्योतिस्स्वरूपिणी माता दीपलक्ष्मी सुमङ्गला ।
सा मां पातु सदा क्षेममङ्गलप्रदमातृका ॥ १

ज्योतीरूपसुरागिण्यै दीपलक्ष्म्यै नमो नमः ।
दिव्यप्रकाशभासिन्यै भगदात्र्यै नमो नमः ॥ २

मुखपद्मप्रकाशिन्यै पद्मज्युत्यै नमो नमः ।
स्मितमुत्यसुशोभिन्यै सिताभायै नमो नमः ॥ ३

पिङ्गाश्ववर्णसौम्यायै पिङ्गलायै नमो नमः ।
रौप्यसाभाससौन्दर्यदीपद्युत्यै नमो नमः ॥ ४

तमस्तिमिरहारिण्यै ज्ञानदीप्त्यै नमो नमः ।
मनःप्रकाशकारिण्यै सानन्दायै नमो नमः ॥ ५

कुङ्कुमाङ्कितशोभायै पूजितायै नमो नमः ।
पुष्पार्चितातिभद्रायै पुण्यकीर्त्यै नमो नमः ॥ ६

त्यागराजगुरुस्वमितेजोरूपे नमोस्तुते ।
शिष्यापुष्पानुतागीतज्योतिर्लक्ष्मि नमोस्तुते ॥ ७

*मङ्गलं दीपलक्ष्म्यै च मङ्गलायै सुमङ्गलम् ।*
*ज्योतिःप्रकाशरूपिण्यै ज्योतिर्लक्ष्म्यै सुमङ्गलम् ॥* ८

ॐ

शुभमस्तु

श्रीवत्सः श्रीशसानन्दः श्रीवत्सं पातु सर्वदा ।
आयुरारोग्यसम्पत्तिं ददातु मङ्गलं वरम् ॥

ॐ

श्रीरामजयम्

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

# ॥ अपराधक्षमा ॥

संसारघूर्णसंतापव्याध्याधिभयपीडिता ।
उद्धारय मदाचार्य अहमस्मि तवाश्रिता ॥ १

क्षुद्रचिन्ताकुलोपेता वैकल्यसङ्कुलान्विता ।
आचार्य तव कर्तव्यं मच्छिद्रन्यूनतापहम् ॥ २

अपराधचयं क्षाम्यं गुरुदेव कृपां कुरु ।
तवास्मीत्येव जानामि अन्यं जाने न मत्प्रभो ॥ ३

न जाने भक्तिवैराग्यं न जाने धर्मसञ्चरम्।
न जाने वेदवेदान्तं न जाने ज्ञानसत्फलम् ॥ ४

रागतालं न जानामि जाने न कृतिकीर्तनम् ।
जपमन्त्रं च जाने न जाने न नामपूजनम् ॥ ५

नादसज्ज्ञानभिक्षां च नाममन्त्रोपदेशनम् ।
नामसद्ध्याननिष्ठां च देहि मे नादसँल्लयम् ॥ ६

नामसङ्कीर्तनानन्दचिन्मयं कुरु मे गुरो ।
दर्शनं तव दिव्यं च कुरु मे तव सात्मताम् ॥ ७

*मङ्गलं ते मदाचार्य त्यागब्रह्मगुरुप्रभो ।*
*मङ्गलं तव पादाय पुष्पार्चिताय मङ्गलम् ॥* ८

ॐ

शुभमस्तु

ॐ

सत्त्वातीतस्वभावाय स्वभावभावभाविने ।
सत्त्वैकगानराजाय त्यागराजाय मङ्गलम् ॥

ॐ

